षादिवापि ज्योत्स्नांतर चंद्रिकायां नारी सुखस्पर्श सुखानि भुंक्ते अनेन बहुस्त्रीकस्य तासु चिंता ३४

३६

अनेनेति कच्चित्कोमल प्रश्ने एभोरुरंभाइव ऊरुयस्याः साहरे रंभोरु अनेन यूनापार्थि
वेन सह वेतिनाथेन सह तेनव मनसः रुचिरस्ति अभिलाषा विद्यते किं कर्तुं उद्यानपरंपरासु उप

अनेन यूना सह पार्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते सिप्रा
गणपति तरंगानिलकंपितासु विहर्तुमुद्यानपरंपरासु ३५ गणपति

वनभूमिषु विहर्तुं क्रीडितुं कथंभूतासु उद्यानपरंपरासु सिप्रातरंगानिलकलं कंपितासु सि
प्रानाम तत्र यान दीतस्यास्तरंगाणां अनिलेन कल्लोलवातेन कंपितासु धूनितासु एनेन
अस्या प्रियाबाहुल्यमुक्तं काननभ्रमणाद्य विहारः ३५ गणपति
३७

ष्टी ६
१०

तस्मिन्निति सा उत्तमसौकुमार्या उत्तमं सौकुमार्यं यस्याः सा उत्कृष्टमार्दवी इन्दुमती तस्मि-
न् अबंधेति नायं भावं चित्ताभिप्रायं न च बंधाभिप्रायं नाकार्षीत् तर्हि निर्गुणो भविष्यति नेत्याह क-
थंभूते तस्मिन् अभिद्योतितबंधुपद्मे अभिद्योतिताः प्रमोदिताः बंधुपद्मा येन सः तस्मिन् अ-
परं कथंभूते प्रतापसंशोषितशत्रुपंके प्रतापेन संशोषिताः शत्रवः पंका येन सः तस्मिन्

गणपति

तस्मिन्नभिद्योतितबंधुपद्मे प्रतापसंशोषितशत्रुपंके बबंध सा नोत्तमसौकुमा-
र्या कुमुद्वती भानुमतीव भावं ॥३६॥ टीका पुनरेव औपम्येन दृढयति केव कुमुद्वतीव य-
था कुमुद्वती कुमुदिनी भानुमति श्रीसूर्ये भावं अनुरागं न बध्नाति कथंभूते सूर्ये अभिद्यो-
तितबंधुपद्मे अभिद्योतितानि विकासितानि बंधुसदृशानि कमलानि येन सः तस्मिन्
अपरं कथंभूते प्रतापसंशोषितशत्रुवर्गे प्रतापेन संशोषिताः शत्रुसदृशाः पंका येन सः तस्मि-
न् यथा कुमुद्वती एतद्विधगुणयुक्तेपि सवितरि शशांकानुरक्तत्वात् अनुरागं न धत्ते



यथा अजभैत्रिया भाविनी सा सर्वथैपि सगुणेपि तस्मिन् नानुरज्यत अनेन कुमार्याः सौकुमार्यं तार-
लैक्षण्यसूचितं उपमालंकारः ॥३६॥ तामिति सुनंदा प्रतिहारी भूयः पुनरपि तां सुदतीं शोभनादंतौ यस्याः
सा तां बहुव्रीहौ दंतस्य दृढभावे शी भवति उगितश्चेति ङीपा जगाद अग्रतः किं कृत्वा अनूपराजस्य अग्रतो वि-
धाय अनूपराजस्य अनूपा गता आपो येषु ते अनूपा नाम देशाः जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध

गणपति

तामग्रतस्तामरसान्तराभामनूपराजस्य गुणैरनूनां । विधाय सृष्टिं ललितां विधातुर्जगाद भूयः
सुदतीं सुनंदा ॥३७॥ टीका इत्यमरः अनूपाख्यदेशाधिपस्याग्रे विधाय स्थापयित्वा कथंभूतां तां तामरसा-
न्तराभां तामरसस्य कमलस्य अंतरं मध्यं कर्णिका तद्वत् आभा कांतिर्यस्याः सा तां पद्मोदरतुल्यकां-
तिकां कनकगौराभित्यर्थः सहस्रपत्रं कमलं शतपत्रं कुशेशयं पंकेरुहं तामरसं मित्यमरः पुनः कथंभूतां
गुणैः अनूनां विनयादिभिर्गुणैः रनूनां संपूर्णां उत्प्रेक्षते विधातुः ब्रह्मणः ललितां सृष्टिमिव मनोह-
रं निर्माणमिव ॥३७॥ गणपति

[illegible]

रघु टी० ६ संग्रामेति तस्य पूर्वपुरुषमाह अथाब वर्णनमाह हेरंदुमती किल इति शृणु तस्य तेका त्रवीनामयों नाम योगी बभूव
कृतवीर्यस्य अपत्यं पुमान् कार्तवीर्यः कथंभूतः कार्तवीर्यः संग्रामनिर्विष्टसहस्रबाहुः संग्रामे निर्विष्टाः
२० अनुभूताः व्यापृताः सहस्रं बाहवो यस्य सः बाहुसहस्रेण संग्रामे वैरि जिग्रामेत्यर्थः यद्वा दर्न्यैर्दृ भुज एव
दृश्यन्त इत्यर्थः पुनः कथंभूतः अष्टादशद्वीपनिखातयूपः अष्टादशसु द्वीपेषु निखाताः आरोपिताः

संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयूपः अनन्यसाधारणराजशब्दो बभूव

गणपति योगी किल कार्तवीर्यः ३८ एकाधर्मपरत्वमुक्तं जनसेनेत्यात्वं पृथिवी सप्तद्वीपा अष्टा
दशद्वीपविनथाव विष्णुपुराणे जंबुप्लक्षाह्वयो द्वीपौ शाल्मलश्चापरो द्वीपः १ कुश क्रौंचौ तथा शा
कपुष्करौ श्चैव सप्तमराति जंबुद्वीपान्तर्गतास्त्विमे नव खंड भेदान्तरण नया अष्टादशत्वं तेषामेषध्ये आगा
नाष्टादशाना जिगीषाया नव द्वयद्वीप पृथक् जयपर्याप्तियो द्वीपसंख्या पादभेत्यात्वं पुनः
कथंभूतः न अनन्यसाधारणराजशब्दः अनन्यैः साधारणः समानो न कोऽन्तरे राजशब्दो यस्य

७०

यन्नाम्ना स्थापिताः यूपाः येन सतथोक्तः

विनेता शिक्षको यः कार्तवीर्यः अकार्यं स्यात् कार्यस्य चिंतायेवं करिष्यामीति बुद्ध्या समा
नकाल मेककालमेव यथा तथा पुरः स्थाने अग्रे चापधरः प्रादुर्भवान् प्रजानां प्रजास्या

अकार्यचिंतासमकालमेव प्रादुर्भवश्चापधरः पुरस्तात् अंतः
गणपति शरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ॥३९॥ गणपति

संतनोजनेत्यमरः अंतःशरीरेषु अंतःकरणेषु शरीरशब्देनेंद्रियं लक्ष्यते अविनयम
पि निषिद्धादि देशमानसापराधमपि निवारयामासेत्यर्थः अन्योतु वाचक्कायापराधमा
त्रेण निकर्त्तरि इति भावः ३९ ॥ गणपति

७१

रघु टीका ४९ टी

ज्याबन्धेति । ज्याबन्धेन निष्पन्दौ निश्चेष्टौ भुजौ यस्य तेन विनिःश्वसन्ती ज्याबन्धोपरोधाद्दीर्घं नि
श्वसन्ती वक्त्रपरंपरा दशमुखी यस्य तेन निर्जितवासवेन निर्जितो वासवो इन्द्रो विजयिनाऽनेन इन्द्रयोऽप्यनेन

ज्याबंधनिष्पंदभुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण कारागृहे नि
र्जितवासवेन लंकेश्वरेणोषितमाप्रसादात् ॥ ४० ॥

जितत्रायएवेतिभावः लंकेश्वरेण दशास्येन यस्य कार्तवीर्यस्य कारागृहे बंधनागारे का
रास्याद्बंधनालय इत्यमरः आप्रसादादनुग्रहपर्यंतं उषितं स्थितं नपुंसके भावे क्तः अतएव तस्य मोक्षोपायो न तु क्षात्रधर्म इति भावः ॥ ४० ॥

गणपति



तस्येति हे इंदुमति तस्य कार्तवीर्यस्य अन्वये वंशे एषः प्रतीप इति नाम्ना भूपतिः जातः उत्पन्नः कथं भूत
एषः आगमवृद्धसेवी आगमेः शास्त्रेर्वृद्धान् सेवते तच्छीलः चिद्विद्वज्जनः आगमैः शास्त्रैः आयान्
तिविश्च्यः एषः कः येन राज्ञा श्रियो लक्ष्म्याः स्वभावलोलेति आशय प्रमृष्टं मार्जितं अपास्तं नि
अस्य वेश्मनी लक्ष्मी स्थिरा वा लोला तत्स्वभावा लोला इति कथं कथ्यते कथंभूतः अयमाशः संश्र

गणपति

तस्यान्वये भूपतिरेष जातः प्रतीप इत्यागमवृद्धसेवी येन श्रियः संश्रयदोषरूढं स्व
भावलोलेत्ययशः प्रमृष्टं ४१ टीका यदोषरूढं अभ्रयस्य दोषेण अविनयाचारेण रूढ
प्रसिद्धं लक्ष्मीस्वभावतः स्थिरा कमलापि अभ्रयति तस्य सद्वृत्ते न्यायाचरणे न स्थिरत्वं अन्ये सं
व दोषेण अविनयाचारेण न स्थिरत्वं अयं तु पुण्यभाक् अतएव लक्ष्मीरेनं न त्यजति अन्यथा यशः प्र
मृष्टं इति वचनेन नकिंचित्कार्पण्य ब्रुवते दृष्टस्य प्रसंगाच्चा लक्ष्मी श्रिय यत्र कृति चातप्रपा दोषसूत्रज
नप्रवाद इत्यर्थः ४१ गणपति

आयोधन इति यः प्रतीपः राजा आयोधने संग्रामे रामपरस्वधस्य परशो भार्गवकुठारस्येत्यर्थः सितां तीक्ष्णं उत्पलपत्रसारां धारां संभावयति मन्यते नहि एवं विधैव भविष्यतीति नोत्या हे क्षत्रियकालरात्रि यथा कालरात्रिः सर्वक्षयं नमति तथैवमपि एवं चैव दुःसहयत्वं तस्याः कथं मन्यते तत्राह



आयोधने कृष्णगतिं सहायमवाप्य क्षत्रियकालरात्रिं॥
धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसारां ४२ ॥

किं कृत्वा आयोधने संग्रामे कृष्णमतिं चिन्हं वन्हिं शुष्मा कृष्णवर्त्मेत्यमरः सहायं अवाप्य तस्य अग्नि नावरोधनतः यदहं रिपुजयेन वसे हाय्य करिष्यामीति ततोपि महत्सहाय्यात् जयो भविष्य वर्त्मेत्यमरः तितोत्पर्यार्थः एतं नगरे जिगीषया गतरिपून् स्वधयतीति विघ्नः ४

अस्येति हे इंदुमती तर्हि त्वं अस्य दीर्घवाहोः अस्य कलत्रत्वात् उत्संगभूमी भव अंकलक्ष्मीभव प्रतीपस्ये एनं वृणुष्वेत्यर्थः अनेन अयं विष्णुतुल्य रतिध्वन्यते यदि प्रसाद जालैः जालैः गवाक्षैरेन यान नर्मदा प्रेक्षितुं द्रष्टुं कामः अभिलाषो अस्ति अलं सम्यक् आसनायोगवासः क्षायैर्हेः

अस्यांकलक्ष्मीर्भव दीर्घबाहोर्माहिष्मतीवप्रनितंबकांची प्रा
सादजालैर्जलवेणीरम्यां रेवां यदि प्रेक्षितुमस्ति कामः ४३



कायपि कीदृशी रेवा महिषातीवप्रतीवतं च कांचीमाहिष्मतीना मा नगरीयतस्याः तदेव नितंबस्तत्रमेखलां कथंभूतां जलवेणीरम्यां जलस्य वेण्या प्रवाहेण रम्यां मनोहरां ओघप्रवाहा वेणी चतिहलायुधः वेणीरिकारांतोपि अस्मिन् पक्षे वाप्रक्षमेव न अन्यत् किंचि दिपदि शब्देन सत्य्यते अंक आशास्था यतया लिंगनमेव स्यात् इति दीर्घबाहुत्वं ४३ ॥

रघुटी० ६ तस्याः [illegible] न स क्षितीशो [illegible] प्रकामं अत्यर्थं [illegible] प्रियदर्शनोऽपि प्रियं प्रीतिकरं दर्शनं यस्य सोऽपि दर्शनी
२२ योऽपीत्यर्थः तस्याः इन्दुमत्याः रुचये प्रीतये न बभूव रुचिं नाजीजनदित्यर्थः लोकाभिन्नारुचिरिति
भावः कइव नरुहरुचेरेतदेवोपम्येन प्रदर्शयति कस्याः कइव नलिन्याः शशिवाय था शशी शीतमा

तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव। शरत्
गणपति प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ४४

पूषः यथास्ति कोऽपि संपूर्णमंडलोऽपि नलिन्याः कमलिन्याः रुचये न भवति [illegible] नहि किंपि तस्या
नलिन्या विदति नेत्यर्थः कथंभूतः शशी शरत्प्रमृष्टांबुधरोपरोधः शरदनुना प्रमृष्टो मार्जितः अंबुधरस्य उप
रोधो यस्य सः निरस्तमेघावरणस्येत्यर्थः शरदि जलदावरणाभावात सितरुचिर्निर्मलश्च नरोऽपि तथा

२९

२२

रघुटी० ६ तां सूरसेनाधिपतिं सुषेणमुद्दिश्य लोकांतरगीतकीर्तिमाचारेण शुद्धयोरुभ
योः वंशयोः मातापितृकुलयोः दीपं प्रकाशकं उभयवंशस्य शुद्धो भयोः पक्षवन्निवाहिः सूरसेना
नां देशानामधिपतिं सुषेणनामनृपतिं उद्दिश्याभिसंधाय शुद्धान्तरक्ष्या अंतःपुरपालिका या कुमार्य
सा शूरसेनाधिपतिं सुषेणमुद्दिश्य लोकांतरगीतकीर्तिं आचारशुद्धोभयवंशदीपं शुद्धांतरक्ष्या
गणपति जगदे कुमारी ४५ निपान्यपः पार्थिवे यज्वा गुणैर्यमाश्रित्य परस्परेण। सिद्धाश्रमं शांतमि
वैत्य सत्त्वैर्नैसर्गिकोऽप्युत्ससृजे विरोधः ४६ डीं० णप्रत्ययः सा कुमारी जगदे ४५ यज्वा विधिव
२ ना० दिष्टवान् सुपर्शेडिः निप्रत्ययः एषपार्थिवो निपानमन्वयो यस्य निपान्वयः नीपवंशजं यं सुषेण
माश्रित्य गुणैः श्रीनमौनादिभिः प्राणिभिरिव नैसर्गिकः स्वाभाविकोऽपि परस्परेण विरोधः उ
त्ससृजे त्यक्तः ४६ गणपति

३०

रघु टी ६
२४

श्लो:
हिमांशुः कांतिश्चंद्रकिरणा इव नयनाभिरामा यस्य सुषेणस्य कांतिः शोभा आत्मगेहे स्वभ
वने सान्निविष्टा संक्रांता अविषह्यं विसोढुमशक्यं तेजः प्रताप स्तु हर्म्याग्रेषु परितेन सौ

गणपति ॥ तस्यात्मगेहे नयनाभिरामा कांतिर्हिमांशोरिव संनिविष्टा ह
र्म्याग्रसंरूढतृणांकुरेषु तेजो विषह्यं रिपुमंदिरेषु ४७ हेतेव

धाग्रेषु संरूढास्तृणांकुरा येषां तेषु शून्येष्वित्यर्थः रिपुमंदिरेषु सन्निविष्टं स्वजनाल्हा
दको द्विषंतपश्चेति भावः ४७ गणपति

४८

यस्य सुषेणस्य वारिविहारकाले जलक्रीडासमये अवरोधा नामंतः पुरांगनानां मलयजानां प्रक्षा
लनाद्धेतोः कलिंगनामशैलः तस्य कन्या मैं यमुना शमनस्वसैत्यमरः मथुरां गंगाभावेव
स्यपि शब्दः कालिंदीतरे मथुरा लवणासुरवधकाले शत्रुघ्नेनानिर्मास्यत इति वक्ष्यति त

गणपति यस्यावरोधस्तनचंदनानां प्रक्षालनाद्वारिविहारकाले क
लिंदकन्या मथुरां गतापि गंगोर्मिसंसक्तजलेव भाति ४८

त्कथं मधुनाभिधुरासंभव इति येचि मिथुरा मथुरापुरीति शब्दभेदो द्वयेनों न्येति मिथु
रां गतापि अस्य राजलो नगरीं गतापि गंगाया विप्रकृष्टापीत्यर्थः गंगा याः भागीरथ्या
र्मिभिः भंगास्तरंगा ऊर्मि र्वा स्त्रियां वीचिरचिर थोर्मि र्वा इत्यमरः संसक्त जलेव भाति धव

४९

रघुटी ६

२८

नास्यत् गरुडात्त्रस्तेन भीतेन यमुनौकसा यमुनायामोकः स्थानं यस्य तेन कालियेन नाम नागेन वि
सृष्टं किल अभयदाननिष्क्रयत्वेन दत्तं वक्षःस्थलव्यापिरुचं मणिं दधानो यः सुषेणः सकौस्तुभं कौस्तुभ
नीति कौस्तुभः समुद्रः तत्र भावः कौस्तुभः रूढ्या विष्णुं ह्रेपयतीव व्रीडयतीव अतिह्रियादिना पुगागमः

त्रस्तेन तार्क्ष्यात्किल कालियेन मणिं विसृष्टं यमुनौकसा यः वक्षःस्थलव्यापिरुचं दधा
नः सकौस्तुभं व्रीडयतीव विष्णुं ४९ संभाव्य भर्तारममुं युवानं मृदुप्रवालोत्तरपुष्पशय्ये वृंदा
वने चैत्ररथादनूने निर्विश्यतां सुंदरि यौवनश्रीः ५० गणपति गजानने

गणपति

भर्ता

कौस्तुभमणेरप्युत्कृष्टोयं मणिरिति भावः ४९ युवानममुं सुषेणं भर्तारं संभाव्य मत्वा रतिस्थाने नांगीकृत्येत्य
र्थः मृदुप्रवालोत्तरा उपरि प्रसरितकोमलपल्लवा पुष्पशय्या यस्मिन् तस्मिन् चैत्ररथात्कुबेरोद्यानादनूने
वृंदावने वृंदावननामके उद्याने हे सुंदरि यौवनश्रीः फलं निर्विश्यतां ५० गणपति हेरंब
वने



किंच प्रावृषि वर्षासु कान्तासु गोवर्द्धनाख्याद्रेः कंदरासु दरीषु दरीतु कंदरो वा स्त्री इत्यमरः यद्वा शिलापुष्पाख्य
ओषधीविशेषः कालानुसार्यं वृद्धाश्मपुष्पशीतशिवानि तु इत्यमरः शिलायाः छद इत्यव शिलाइति चोगवि
भागादिवार्थे ढक्प्रत्ययः तद्वद्गंधवंति शैलेयगंधीनि शिलातलानि अध्यास्याधिष्ठाय कलापिनां बर्हिणां नृ

अध्यास्य चांभः पृषतोक्षितानि शैलेयगंधीनि शिलातलानि कलापिनो
प्रावृषि पश्य नृत्यं कांतासु गोवर्धनकंदरासु ५१ नृपं तमावर्तमनोज्ञनाभिः सा
व्यत्यगादन्यवधूर्भवित्री महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ५२

गणपति

त्यं पश्य ५१ आवर्त इवांभसां भ्रम इव स्यादावर्तोंभसां भ्रम इत्यमरः आवर्त इव मनोज्ञा नाभिर्यस्याः
सा इदं च नदीसाम्यार्थं मुक्तं अन्यवधूरन्यस्य पत्नी भवित्री भाविनी सा कुमारी तं नृपं सागर [illegible]
गामिनी सागरगंत्री स्रोतोवहा नदी मार्गवशादुपेतं प्राप्तं महीधरं पर्वतमिव व्यत्यगात् अतीत्य ग

रघुटी ६
२६

अथेभुजिष्यां किंकरीं सुनंदां भुजिष्याः किंकरीमतः इति हलायुधः अंगदाश्लिष्टभुजं केयूर
नद्धबाहुं सादितशत्रुपक्षं विनाशितशत्रुवर्गं हेमांगदं नाम कलिंगदेशनाथं आसेदुषी अ
संन्नामेव बालेंदुमुखीं पूर्णेंदुमुखीं बाला कुमारीं सुनंदा बभाषे ॥५३॥ माहेंद्राद्रिः समानसारः

अथांगदाश्लिष्टभुजं भुजिष्या हेमांगदं नाम कलिंगनाथं आसेदुषी
सादितशत्रुपक्षं बालामबालेंदुमुखीं बभाषे ॥५३॥ असौ महेंद्राद्रिसमान
सारः पतिर्महेंद्रस्य महोदधेश्च यस्य क्षरत्सैन्यगजच्छलेन यात्रासु यातीव पुरो महें

गणपति

तुल्यबलो सौ हेमांगदः महेंद्रस्य नाम कुलपर्वतस्य महोदधेश्च पतिः स्वामी महेंद्रम
होदधी एवास्य गिरिजलदुर्गे इति भावः यस्य यात्रासु क्षरतां मदश्राविणां सैन्यगजा
नां छलेन व्याजेन महेंद्रः महेंद्राद्रिः पुरो ऽग्रे यातीव अर्वद्रिकल्पा अस्य गजा इति भावः ॥५४॥

५२

सुभुजः चापभृतां पुरोगः धनुर्धराणामग्रेसरः यो बंदीकृतानां गृहीतानां विग्रहा
त्रग्रहीबंधावित्यमरः रिपुश्रियां सांजनो बाष्पसेकौ ययोस्ते कज्जलेन मिश्राश्रुयु

ज्याघातरेखे सुभुजो भुजाभ्यां बिभर्ति यश्चापभृतां पुरोगः रि
पुश्रियां सांजनबाष्पसेके बंदीकृतानामिव पद्धती द्वे ॥५५॥

गणपति

क्ते इत्यर्थः पद्धती च ज्याघातानां मौर्वीकिणानां रेखे राजी भुजाभ्यां बिभर्ति द्विवच
नात्सव्यसाचीत्वं गम्यते रिपुश्रिया भुजाभ्यामेव ग्रहणात् इतरेतराश्रयो सतस्य इति
सेनोत्सेक्ष्यत यो ध्यामलासांजनाश्रुसेकोक्तिः ॥५५॥

रघुटी०
२८

आलसमनि सुमंत्रं यं हेमांगदं सन्निविष्टः समीपस्थः अतएव प्रसादवातायनेदृश्यवी
चिः मंद्रेण गंभीरेण ध्वनिना स्याजितो विसर्जितः यामस्य तूर्यः प्रहरावसानसूच

गणपति

यमात्मनः सद्मनि संनिविष्टो मंद्रध्वनित्याजितयामतूर्यः प्रा
सादवातायनदृश्यवीचिः प्रबोधयत्यर्णव एव सुप्तं ॥ ८८ ॥

कं यामं येन सः तथोक्तः मंद्रस्तु गंभीरः द्वौ यामप्रहरौ समौ इत्यमरः अर्णव एव प्रबो
धयति अर्णवस्यैव तूर्यकार्यकारित्यानद्ध्यर्थमिति भावः समुद्रस्यापि सेव्यः
[illegible]न्यथामिति ध्वन्यते ॥८८॥
किमं

५४

अनेन राजा सार्द्धं तालीवने ममरेषु मर्मरैरिति स्वनवत्सु अथ मर्मरः स्वनिते वस्त्र
पर्णानामित्यमरः वचनाद्गुणपरमेस्य रस्यापि मर्मरशब्दस्य गुणिपरत्वं प्रयोगा

गणपति

अनेन सार्द्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु ॥ ॥ वद्वी
पांतरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिः ॥ ८९

देवसहयं अंबुराशेः तीरेषु द्वीपांतरेभ्यः आनीतानि लवंगपुष्पाणि देवकुसुमानि येसे
दैः लवंगं देवकुसुमम् इत्यमरः मरुद्भिः वातैः अपाकृताः स्वेदस्य लवाः बिंदवो यस्याः
तथाभूता सती त्वं विहर क्रीडा ॥९०

५५

घुटीका

अरूत्यास्वरूपेण लोभनीयां विदर्भराजावरजां तथैव ॥ तस्मादपावर्तत दूरकृष्टां नीत्येव लक्
॥२८॥ क्ष्मीः कर्षनीया न तु वर्णनामात्रेणेत्यर्थः विदर्भराजा भोजा इंदुमती तया सुनंदया एवं प्रलो
भिताभिप्रबोधिता ॥

ग दूर

अतः लोभिताप्याकृत लोभनीया विदर्भराजावरजा तथैव ॥ तस्मा

गणपात दपावर्तत कृष्टनीत्येव लक्ष्मीः प्रतिकूलदैवनात् ॥६८॥ विनीत्या पुरुषकरण दू
र कृष्टा दूरमनीता लक्ष्मीः प्रतिकूलं दैवं यस्य सः तस्मात्पुंस इव तस्माद्भूमागदात्
अपवर्तत निवृत्ता ॥६८॥

नत्र



अथ द्वारे नियुक्ता दौवारिकी सुनंदा तत्र नियुक्ता इति ठक् प्रत्ययः द्वारादिनां चेत्यनाग
गमः आकारः देवस्य रूपं देव तुल्यं उरगाख्यस्य पुरस्य पोड्य देशकालाः कुठारव
र्ति नागपुरस्य नाथं एत्य प्राप्य हे चकोराक्षि इतो विलोकयेति पूर्वानुशिष्टा पुर्वमुक्ता भोजस्य

अथोरगाख्यस्य पुरस्य नाथं दौवारिकी देवसरूपमेत्य। इतश्चको

गणपात नि राक्षि विलोकयेति पूर्वानुशिष्टां निजगाद भोज्यं ॥६९॥

जो गोत्रापत्यं स्त्रियं भोज्यां इंदुमती क्रोड्यादिभ्यः ष्यङ् सत्र कौशल्यान्नियइति उपसंख्या
नात् ॥ ष्यङ्त्रेङ्गत्ययः अपिभ्याविभर्ति चा तप् ॥ निजगादेति ॥ नेविलोकये ताबि
लोकयेति पूर्वमुक्ता पश्चात् वक्तव्यं निजगादेत्यर्थः ॥६९॥

रघुवंशी का ६

॥२९॥

पांड्यइति अंसयोरर्पितः लंबितः लंबहारो यस्य हरिचंदनेन गोशीर्षाख्येन चंदनेन तैलपर्णिकगोशीर्षे ह
रिचंदनमस्त्रियामित्यमरः कॢप्तो रचितो अंगरागो अनुलेपनं येन तथोक्तः। पांड्यानां जनपदानां राजा
पांड्यः॥ पांड्यचोलजनपदशब्दात् क्षत्रियात् ञ्यण् कलंब्य इति ञ्यणप्रत्ययः बालातपेन रक्ताः अरुणाः सान

गणपति

पांड्योयमंसार्पितलंबहारः कॢप्तांगरागो हरिचंदनेन॥ आभाति
र बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः॥ ६०॥

वो यस्य सः सनिर्झरोद्गारः प्रवाहास्यंदनसहितः अद्रिराज इव हिमाद्रिरिवाभाति॥ ६०॥ विंध्यस्येति
विंध्यनाम्नो महाद्रेः तपनमार्गनिरोधाय वर्द्धमानस्येति शेषः संस्तंभयिता निवारयिता निःशेषपीतः
र स्य ३ उज्झितः पुनस्त्यक्तः सिंधुराजः समुद्रो येन तथोक्तः अगस्त्यः अश्वमेधस्य दीक्षांतावभृथे दीक्षांते कर्मणि



दीक्षांतेवभृथो यज्ञ इत्यमरः॥ आर्द्रमूर्तेः स्नानस्येत्यर्थः यस्य पांड्यस्य प्रीत्या स्नेहेन न तु दाक्षिण्येन सुस्ना
तं पृच्छतीति सौस्नातिकः भवति पृच्छतो सुस्नातादिभ्य इति ठक्॥ ६१॥ अस्त्रमिति पुरा पूर्वं जनस्था

विंध्यस्य संस्तंभयिता महाद्रेर्निःशेषपीतोज्झितसिंधुराजः॥ प्रीत्याश्वमे
धावभृथार्द्रमूर्तेः सौस्नातिको यस्य भवत्यगस्त्यः॥ ६१॥ अस्त्रं हरादाप्तव
गणपति तादुरापं येनेंद्रलोकावजयाय दृप्तः॥ पुराजनस्थानविमर्दशंकी संधाय लंकाधि

न विमर्दशंकी दृप्तः उद्धतो लंकाधिपतिः रावणः दुरापं दुर्लभं अस्त्रं ब्रह्मशिरो नामकं हरादाप्तवता ये
न पांड्येन संधाय इंद्रलोकावजयाय इंद्रलोकं जेतुं प्रतस्थे। इंद्रविजयिनो रावणस्यापि विजेतेत्य
र्थः॥ ६२॥

अनेन पाणौ विधिवद्गृहीते महाकुलीनेन महीव गुर्वी ॥ रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव

रघुटीका अनेनेति महाकुलीनेन महत्कुले जातेन महाकुलादञ्खञाविति खञ्प्रत्ययः। अनेन पाण्ड्येन त्वं दीये

३० पाणौ विधिवद्यथाशास्त्रं गृहीते सति गुर्वी गुरुः। वोतो गुणवचनादिति ङीप् महीव रत्नैरनुविद्धो व्याप्तो

अर्णव एव मेखला यस्याः इदं विशेषणं महीपक्षे दुमत्यां च योज्यं दक्षिणस्याः दिशः सपत्नी भव अनेन सप

ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु ॥ तमा

गणपति लपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ॥ ६४ ॥

त्न्य नराभवेत्यध्वन्यते ॥६३॥ ताम्बूलेति ताम्बूलवल्लीभिः नागवल्लीभिः परिणद्धाः परिरब्धाः पूगाः क्र

मुकाः यासु ताम्बूलवल्ली ताम्बूलि नागवल्ल्यप्यथ द्वि जाद्यो यत्तु पूगः क्रमुको इति चामरः। एलालताभिः

१ लिं आलिङ्गिताश्चन्दनाः यासु तासु गन्धसारो मलयजो भद्रश्रीश्चन्दनो स्त्रियामित्यमरः। तमालस्य



तमालपत्रस्य पत्राण्यास्तरणानि यासु तासु कालस्कन्धस्तमालस्तापिच्छोऽप्यथ सिन्दुके इत्यमरः। मल

यस्थलीषु शश्वत् मुहुः सदा वा रन्तुं प्रसीद अनुकूला भव ॥ ६४ ॥ इन्दीवरेति असौ नृपः इन्दीवरश्या इ

इन्दीवरश्यामतनुर्नृपोऽसौ त्वं रोचनागौरशरीरयष्टिः ॥ अन्योन्यशो

गणपति भापरिवृद्धये वां योगस्तडित्तोयदयोरिवास्तु ॥ ६५ ॥

मतनुः त्वं रोचनेव गौरी शरीरयष्टिर्यस्याः सा तथोक्ता तडित्तोयदयोर्विद्युन्मेघयोरिव वां यु

वयोर्योगः समागमो अन्योन्यशोभापरिवृद्धये अस्तु ॥ ६५ ॥ ॥ गणपति ॥ ॥

रघुटीका
३१

स्वसुरिति विदर्भाधिपतेर्भोजस्य स्वसुरिंदुमत्याः चेतसि तदीयः सुनंदासंबंधी पदेशो वाक्यं
दिवाकरस्यादर्शनेन बद्धकोशमुकुलिनी अरविंदे नक्षत्रनाथांशुश्चंद्रकिरण इव अंतरं अ
वकाशं न लेभे न प्राप ॥६६॥ संचारिणीति पतिंवरा सा इंदुमती रात्रौ संचारिणी दीपशिखे

गणपति

स्वसुर्विदर्भाधिपतेस्तदीयो लेभेंतरं चेतसि नोपदेशः ॥ दिवाकरादर्शनबद्धकोशे
नक्षत्रनाथांशुरिवारविंदे ॥६६॥ संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा
॥ नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥६७॥

व यंयं भूपालं व्यतीयाय अतीत्य गता स स भूमिपाल इत्यर्थः नित्यवीप्सयोरिति विप्सायां
द्विर्वचनं नरेंद्रमार्गे राजपथे अट्टः स्थिगृहभेद इव स्यादट्टः क्षौममस्त्रियामित्यमरः
े छ्या३ विवर्णभावं विछायत्वं अट्टस्तु तमो वृत्तित्वं प्रपेदे ॥६७॥

६२

धि मा

तस्यामिति तस्यामिंदुमत्यामुपस्थितायां सन्निधानायां सत्यां रघोः सूनुरजो मां वृणीत न वेति समाकु
लो संशयितोऽभूत् अथास्याजस्य वामेतरो वामादितरो दक्षिणो बाहुः केयूरं बध्यते यस्मिन्नि
ति केयूरबंधः अंगदस्थानं तस्य उच्छ्वसितैः स्फुरणैः संशयं नुनोद ॥६८॥ तमिति कुमारी इंदुम

गणपति

तस्यां रघोः सूनुरुपस्थितायां वृणीत मां नेति समाकुलोऽभूत् ॥ वामेतरः संशयमस्य
केयूरबंधोच्छ्वसितैर्नुनोद ॥६८॥ तं प्राप्य सर्वावयवानवद्यं व्यावर्तता
न्योपगमात्कुमारी ॥ न हि प्रफुल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली ॥६९॥
ती सर्वैरवयवैरनवद्यं अदोषं तमजं प्राप्य अन्योपगमात् राजांतरोपगमात् व्यावर्तत निवृत्ता तथा
लि हि षट्पदानां भृंगाणां आली प्रफुल्लं फुल्लतीति प्रफुल्लं विकसितं पुष्पितमित्यर्थः फुल्लतेः पचाद्यच् फ
लतेस्तु प्रफुल्लमिति निपातितं अनुपसर्गादिति निषेधे पादिस्थे भेत्यु भाया पिनक

च

६३

रघु टी सदाचिदनुपपत्तिरित्युक्तं प्राक् सत्कारं च तद्विशेषमेव अभ्यर्थनोरसाकौ सौ सत्कारो निसोर
भ इत्यमरः। वृक्षांतरेऽन्न कास्ति नहि सर्वोत्कृष्टः भेव त्वं तरेस्याभिरूयास्यादित्यर्थः॥६९॥
॥ ७२ ॥ तस्मिन्निति तस्मिन्नजे समाविशिता आरोपिता चित्तवृत्तिर्यया तां इंदोः प्रभेव प्रभा य

तस्मिन्समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य॥ प्रचक्र
मे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनंदा॥७०॥

स्यास्तां अजहारा कारित्यादिरुक्ताम्यां इंदुमतीमवेक्ष्यानुक्रमज्ञा वाक्यपौर्वापर्याभिज्ञा सु
नंदा इदं वक्ष्यमाणं सविस्तरं सप्रपंचं प्रथने वाचि शब्दे इति घञो निषेधात् ऋदोरप् पर्यु
स्त्रयः समौ शब्दस्य विस्तर इत्यमरः॥ वाक्यं वक्तुं प्रचक्रमे उपक्रांतवती॥७०॥ इक्ष्वाक्वि



इक्ष्वाक्विति इक्ष्वाकोः मनुपुत्रस्य वंशे भवः नृपाणां राज्ञां ककुदं श्रेष्ठः ककुत्त्व ककुदं श्रेष्ठे
वृषांसे राजलक्ष्मणि निविश्वः आहितलक्षणः प्रख्यातगुणः गुणैः प्रतीते तु कृतलक्षणाहि
तलक्षणाविस्यमरः ककुदे वृषांसे तिष्ठतीति ककुत्स्थ इति प्रसिद्धः कश्चिद्राजाभूत् यतः

गणपति इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत्॥ का
कुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोसलेंद्राः॥७१॥

केकेस्यादारभ्य उन्नतेच्छाः महाशयाः महेच्छस्तु महाशय इत्यमरः। उत्तरकोसलेंद्राः राजा
नो दिलीपादयः श्लाघ्यं स्तुत्यं ककुत्स्थस्यापत्यं पुमान् काकुत्स्थ इति शब्दं संज्ञां दधति
बिभ्रति तन्नाम संस्पर्शोऽपि वंशस्य कीर्तिकर इति भावः पुरा किल पुरंजयो नाम

रघुटीका

॥ रु२ ॥ साक्षाद्विष्णोरपि वेनोरंशः अवतारः कश्चिदिक्ष्वाकुराजादेवैः सह समयसंबद्धदे
वासुरयुद्धे महोक्षरूपधारिणो इंद्रस्य ककुदि स्थित्वापि नाकिलीलया निखिले
मसुरकुलं निहत्य ककुत्स्थसंज्ञां लेभे इति पौराणिकी कथानुसंधेया वक्ष्यते
चायमेवार्थमुत्तरश्लोके ॥७१॥ महेंद्रमिति यः ककुत्स्थः संयति युद्धे महान् उक्षा
महोक्षः अचतुरेति निपातः तस्य रूपमिव रूपं यस्य तं महेंद्रमास्थायारुह्य अत एव प्रा
प्तपिनाकिनः ईश्वरस्य लीला येन स तथोक्तः सन् बाणैरसुरांगनानां गंडस्थलीः प्रो
षितगंडलेखाः निवृत्तपत्ररचनाः चकार । तद्भर्तृनसुरानवधीदित्यर्थः ॥ ॥ ।

६६

नहि विधवाः प्रसाध्यंत इति भावः ॥७२॥ ऐरावतेति यः ककुत्स्थः ऐरावतस्येंद्रगजस्य आस
फालनेन ताडनेन विश्लथमंगदं ऐंद्रं अंगदेन स्वकीयेन संघट्टयन् संघर्षयन् अग्र्यां

महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः ॥ चकार बाणैरसु
रांगनानां गंडस्थलीः प्रोषितपत्रलेखाः ॥७२॥ ऐरावतास्फालनविश्ल
गणपति थं यः संघट्टयन्नंगदमंगदेन ॥ उपेयुषः स्वामपि मूर्तिमग्र्यामर्धासनं गोत्रभिदो

श्रेष्ठां स्वां मूर्तिमुपेयुषोपि प्राप्तस्यापि च गोत्रभिदो इंद्रस्य आसनस्यार्धमर्धासनं समनपुं
सकमिति समासः अधितिष्ठौ अधिष्ठितवान् स्थादिष्वभ्यासेन चाभ्यासस्य व्यवायेपि ष
त्वं नकेवलं मनुष्यत्वेनेति भावः ॥७३॥

६७

घुटीका जात इति उरुकीर्तिर्महायशाः कुलप्रदीपो दिलीपो नाम नृपतिः तस्य ककुत्स्थस्य कुले जातः उरुकीर्तिः
किल यो दिलीपः शक्रस्य इंद्रस्य अभ्यसूयायाः विनिवृत्तये अपाकरणायेति भावः एकेनोनाः
शतं क्रतवो यस्य स एकोनशतक्रतुस्तस्य भावे तत्त्वे तिष्ठते इंद्रप्रीतये शततमं क्रतुं न अवशेषि

जातः कुले तस्य किलोरुकीर्तिः कुलप्रदीपो नृपतिर्दिलीपः ।। अतिष्ठदेकोनशतक्रतुत्वे
शक्राभ्यसूयाविनिवृत्तये यः ।।७४।। यस्मिन्महीं शासति वाणिनीनां निद्रां विहारार्द्ध
पथे गतानां ।। वातोऽपि नास्रंसयदंशुकानि को लंबयेदा[illegible]हरणाय हस्तं ।।७५।।

त[..]त्यर्थः ।।७४।। यस्मिन्निति यस्मिन् दिलीपे महीं पृथ्वीं शासति सति विहारस्यार्द्धेति विहा
रः ।। क्रीडास्थानं तस्यार्द्धपथे निद्रां गतानां वाणिनीनां मत्तांगनानां वाणिनी नर्तकी मत्ताविद
विदग्धवनितासु चेति विश्वः ।। वणिन्यो नर्तकी दूत्योः इत्यमरः अंशुकानि वस्त्राणि वा



तोऽपि नास्रंसयत् नाकंपयत् आहरणाय आहर्तुं कोऽहस्तं लंबयेत् तस्य आज्ञासिद्धत्वात् कुतो
भयसंचाराः प्रजा इत्यर्थः अर्धं च असौ पंथाश्चेति विग्रहः समप्रविभागे प्रमाणाभावान्नैक
देशिसमासः ।।७५।। पुत्र इति विश्वं जित्वा क्रियते तथोक्तो विश्वजित् तस्य विश्वस्य जितो नाम

पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ।। चतुर्दिगावर्जितसंभृ
गणपति तां यो मृत्पात्रशेषामकरोद्विभूतिं ।।७६।। आरूढमद्रीनुदधीन्वितीर्णं भुजं
गमानां वसतिं प्रविष्टं ।। ऊर्ध्वं गतं यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ।।७७

महाक्रतोः प्रयोक्ता अनुष्ठाता तस्य दिलीपस्य पुत्रो रघुः पदं पैत्र्यमेव प्रशास्ति पालयति यो रघुश्च
तसृभ्यो दिग्भ्यो आवर्जिता आहृता संभृता सम्यक् वर्द्धिता च ताः चतुर्दिगावर्जितसंभृता
विभूतिं संपदं मृत्पात्रमेव शेषं यस्यास्तामकरोत् विश्वजिद्धि यागस्य सर्वस्वदक्षिण

रघु टीका कत्यादित्यर्थः ॥७६॥ आरूढमिति किंच आद्रीनारूढं उदधीन्वितीर्णं अवगाढं सक
३९ लभूगोलव्यापकमित्यर्थः ॥ भुजंगमानां वसतिं पातालं प्रविष्टं ऊर्ध्वं स्वर्गादिकं गतं
व्याप्तं इत्थं सर्वदिग्व्यापीत्यर्थः अनुबध्नातीत्यनुबंधि चेदधि अविच्छेदकालत्रय

ति आरूढमद्रीनुदधीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टं ॥ ऊर्ध्वं गतं
गणपति यस्य न चानुबंधि यशः परिच्छेत्तुमियत्तयालं ॥७७॥

व्यापकं चेत्यर्थः अनवधेर्वैवंभूतं यस्य यशः इयत्तया देशतः कालतो वा केनचिन्मा
नेन परिच्छेत्तुं परिमातुं नालं न शक्यं ॥७७॥ असाविति असौ अजाख्यः कु
मारस्त्रिविष्टपस्य स्वर्गस्य पतिमिंद्रं जयंत इव जयंतः पकशासनीरित्यमरः तं रघुं



अनुजातः तस्माज्जात इत्यर्थः तजातेपि तदनुजातो भवति । जन्यजनकयोरानंतर्यात् गत्य
र्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति क्तः सोपसृष्टत्वात्सकर्मके

असौ कुमारस्तमजोनुजातस्त्रिविष्टपस्येव पतिं जयंतः ॥ गु
गणपति र्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशीं बिभर्ति ॥७८॥

त्वं आह चात्रैव सूत्रे वृत्तिकारः श्लिषादयः सोपसर्गाः सकर्मका भवंतीति दम्यः शिक्षणी
याभवत्वो वत्सो यो जः गुर्वीं भुवनस्य धुरं धुर्येण धुरंधरेण निरूढेन पित्रा सदृशीं
तुल्यं यथा तथा बिभर्ति । यथा कश्चिद्दम्यस्तरुणोपि धुर्येण महोक्षेण समं वहतीत्युपमालं

य-

रघुवी का
३९

च्यन्ते दम्यवत्सतरौ समौ इत्यमरः ॥७८॥ कुलेनेति कुलेन कांत्या लावण्येन नवेन व
यसा विनयः प्रधानं येषां तैः तैस्तैः गुणैः श्रुतशीलादिभिश्च आत्मनः तुल्यं स्वानुरूपम
मुं अजं वृणीष्व किं बहुना रत्नं कांचनेन सुवर्णेन समागच्छतु संगच्छतां प्रार्थनायां

कुलेन कांत्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ॥ त्वमात्मनस्तु
ल्यममुं वृणीष्व रत्नं समागच्छतु कांचनेन ॥७९॥ ततः सुनंदावचना
वसाने लज्जां तनूकृत्य नरेंद्रकन्या ॥ दृष्ट्या प्रसादामलया कुमारं प्रत्य

गणपति

कोटू रत्नकांचनयोरिवास्य तमनुरूपत्वाद्वधूवरयोः समागमः प्रार्थ्यत इत्यर्थः ॥७९॥ तत इ
ति ततः सुनंदावचनस्यावसाने अंते नरेंद्रकन्या इंदुमती लज्जां संकोचं तनूकृत्य प्रसा
देन मनःप्रसादेन मलया प्रसन्नया दृष्ट्या संवरणस्य स्रजा संवरणार्थस्रजेव



कुमारमजं प्रत्यग्रहीत् स्वीचकार सम्यक् सानुरागमपश्यदित्यर्थः ॥८०॥ सेति सा कुमा
री यूनि तस्मिन्नजे अनुरागबंधं अभिलाषग्रंथिं शालीनतया धृष्टतया स्याद
धृष्टे तु शालीन इत्यमरः ॥ शालीककौपिने अधृष्टाकार्ययोरिति निपातः व

सा यूनि तस्मिन्नभिलाषबंधं शशाक शालीनतया न वक्तुं ॥ रो
मांचलक्ष्येण स गात्रयष्टिं भित्त्वा निराक्रामदरालकेश्याः ॥८१॥

गणपति

क्तुं न शशाक तथापि अरालकेश्याः वक्रकेश्याः अरालं वृजिनं जिह्ममित्य
मरः सः अभिलाषबंधः गात्रयष्टिं शरयष्टिं रोमांचलक्ष्येण भित्त्वा निरा
क्रामत् सात्त्विकाविर्भावलिंगेन प्रकाशित इत्यर्थः ॥८१॥ ॥

रघुटीका तथेति साख्यामिंदुमत्यां तथागतायां तथाभूतायां दृष्टानुरागायां सत्यामित्यर्थः वे
॥ ३५ त्रधरा सखी सहचरी सख्यशिश्वीविभाषायामिति निपातनान्‍ङीप् ॥ हे आर्ये

तथागतायां परिहासपूर्वं सख्यं सखी वेत्रधरा बभाषे ॥ आ
गणपति र्ये व्रजामोऽन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥ ८२ ॥

पूज्ये अन्यतः अन्यं प्रति व्रजाम इति परिहासपूर्वं आबभाषे ॥ अथ वधूः इंदु
मती एनां सखीं ~~सुनंदां~~ सुनंदां असूयया रोषेण कुटिलं ददर्श अन्यागमनस्यासह्य



सेति करभः करप्रदेशविशेषः मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः । कर
भः उपमानं ययोस्तौ करभोपमौ ऊरू यस्याः तथोक्ता ऊरूत्तरपदादौपम्ये इत्यूङ् प्र
त्ययः सा कुमारी चूर्णेन मंगलचूर्णेन गौरं रक्तोहितं गुणं स्रजं मूर्तं मूर्तिमं

सा चूर्णगौरं रघुनंदनस्य धात्रीकराभ्यां करभोपमोरूः ॥ आ
गणपति संजयामास यथाप्रदेशं कंठे गुणं मूर्तमिवानुरागं ॥ ८३ ॥

तं अनुरागं प्रीतिमिव धात्र्या उपमातुः सुनंदायाः कराभ्यां रघुनंदनस्या
जस्य कंठे प्रदेशं यथास्थानं आसंजयामास आसक्तं कारयामास नतु
स्वयमाससंजअनौचित्यात् ॥ ८३ ॥

रघुटीका
७८

तथेति वरेण्यो वरणीयः उत्कृष्ट इत्यर्थः। वरेण्यः सोजः मंगलपुष्पमय्या व
धुकादिकुसुमनिर्मितया विशालवक्षःस्थलेलंबमानया तया स्रजा
विदर्भराजावरजां इंदुमतीं कंठार्पितौ बाहू एव पाशौ यया तां अमंस्त मन्यते स्म

तया स्रजा मंगलपुष्पमय्या विशालवक्षःस्थललंबयासः॥
अमंस्त कंठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः॥८४॥

गणपति

इः बाहुपाशकल्पं सुखमन्वभूदित्यर्थः॥८४॥ शशिनमिति। तत्र स्वयंव
रे समगुणयोस्तुल्यगुणयोः इंदुमतीरघुनयोः योगेन प्रीतिर्येषां ते समगु
णयोगप्रीतयः पौराः पुरे भवाः इयमजसंगता इंदुमती मेघमुक्तं शशिनं



शरच्चंद्रमुपगता कौमुदी अनुरूपं सदृशं जलनिधिमवतीर्णा प्रविष्टा जन्हुक
न्या भागीरथीव सदृशीत्यर्थः। इत्येवं नृपाणां श्रवणयोः कटु परुषमेकम सं
वादिवाक्यं विचक्रुः। उमालिनीवृत्तमेतत्। तदुक्तं ननमयययुतेयं मालिनी भो
७८ शशिनमुपगतेयं कौमुदी मेघमुक्तं जलनिधिमनुरूपं जन्हुकन्याव
तीर्णा॥ इति समगुणयोगप्रीतयस्तत्र पौराः श्रवणकटु नृपाणा
मेकवाक्यं विवव्रुः॥ अमिकोके:॥८५॥ प्रमुदितेति एकतः एकत्र प्रमु
दितो दृष्टो वरस्य जामातुः पक्षो वर्गो यस्य तथोक्तः। अन्यतो अन्यत्र वितानं

*चुः२
गणपति

अन्यं चितानं विधुतुच्छके त्यमरः भग्नाशत्वादत्र हृष्टमित्यर्थः॥ तत्र क्षितीपतिमंडलं उष
सि प्रभाते प्रफुल्लपद्मं विकेशितकमलं कुमुदवनेन प्रतिपन्नाप्रामानिद्रानिमीलं

प्रमुदितवरपक्षमेकतस्तत्क्षितिपतिमंडलमन्यतो वितानं॥ उषसि सर इव
प्रफुल्लपद्मं कुमुदवनप्रतिपन्ननिद्रमासीत्॥ ॥८६॥

नं येन तथोक्तं सदृशैरेव स्वरैस्तुल्यमभिधायासीत् पुष्पिताग्राभिधं वृत्तमेतत्॥८६॥ इति श्री
पदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथविरचितायां
संजीवनीसमाख्यायां रघुवंशटीकायां षष्ठः सर्गः समाप्तिं गतः॥ श्रीगजाननार्पणमस्तु
॥८५॥

श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥एकलोचनमेकार्थंसार्द्धलोचनमन्ततः॥लीलार्थंनीलकंठार्थंमहःकिमपि
मन्महे॥१॥पितुरिति॥समाधिनासंयमेनजितानिइंद्रियाणियेनसः यमोनियमोविद्यतेयेषांतेषांयमवंतःसं
यमिनःअवंतीतिअवंतःरक्षंतःतेषांअवतांरक्षतांराज्ञांचधुर्यग्रेस्थितःमहारथःदशरथःआत्मानंसारथिंचा

पितुरनंतरमुत्तरकोसलान्समधिगम्यसमाधिजितेंद्रियः॥
दशरथःप्रशशाससमहारथोयमवतामवतांचधुरिस्थितः॥१॥

श्चयुद्धेरक्षितिनरःयुध्यतेदशसाहस्रैःसमहारथउच्यते॥१॥पितुरनंतरंउत्तरकोसलान्जनपदान्सम
धिगम्यप्राप्यप्रशशासपालयामासेत्यर्थःअत्रमनुःक्षत्रियस्यपरोधर्मःप्रजानांपरिपालनंमितिद्रुतविलं
बितमेतद्वृत्तंतदुक्तंद्रुतविलंबितमाहनभौभरायिति॥१॥

सं०९
३

अधिगतमिति॥ अधिगतं प्राप्तं आत्मकुलोचितं स्वकुलानुगतं सनगरं प्रकृतिमंडलं नगरजनसहितं जनपदमंडलं अत्र प्रकृतिशब्देन अमात्यवाचिना नगरशब्दयोगात् गोबलीवर्दन्यायेन जनपदमात्रमुच्यते यत् यस्मात् विधिवत् यथाशास्त्रमपालयत् ततः हेतोः रंध्रं करोतीति रंध्रकरः रंध्रहेतुरित्यर्थः हेतुताच्छील्यानुलोम्येषु इति टप्रत्ययः

अधिगतं विधिवद्यदपालयत्प्रकृतिमंडलमात्मकुलोचितं॥
अभवदस्य ततो गुणवत्तरं सनगरं नगरंध्रकरौजसः॥ २॥

नगस्य रंध्रकरः नगरंध्रकरः कुमारः कुमारः क्रौंचदारण इत्यमरः तदोजसः तत्तुल्यबलस्य अस्य दशरथस्य गुणवत्तरं अभवत् तयोरज्ञानपदमंडलं तस्मिन् काले तीवासक्तमभूदित्यर्थः॥ २॥ ७ ७ ॥ ७

2

उभयमिति॥ मनसः ईषिणो मनीषिणो विद्वांसः पृषोदरादित्वात् साधुः बलनिषूदनं इंद्रं दंडस्य धरो राजा मनुरिति यो दंडधरः स एव अन्वयः कूटस्थो यस्य तं अर्थपतिं दशरथं च इत्युभयमेव समये अवसरे जलं धनं वर्षतीति समयवर्षि तस्य भावेन समयवर्षितया हेतुना कृतकर्मणां सत्कर्मकारिणां नुददतीति नुदं इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः श्रमस्य नुदं श्रमनुदं वदंति तत्र नेद उभयशब्देन सामाना

उभयमेव वदंति मनीषिणः समयवर्षितया कृतकर्मणां॥ बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदंडधरान्वयं॥ ३॥ जनपदे न गदः पदमादधावभिभवः कुत एव सपत्नजः॥ क्षितिरभूत्फलवत्यजनंदने शमरतेऽमरतेजसि पार्थिवे॥ ४॥

धिकरणं नस्यादिति वक्तव्यं॥ ३॥ जनपद इति॥ शमरते शांतिपरे अमरतेजसि अजनंदने दशरथे पार्थिवे पृथिव्या ईश्वरे सति तस्येश्वर इत्यण्प्रत्ययः जनपदे देशे गदो व्याधिः रोगव्याधिगदामयः इत्यमरः पदं नादधौ नाक्रामदित्यर्थः सपत्नजः शत्रुजन्यः अभिभवः कुत एव असंभावित एवेत्यर्थः क्षितिः फलवती अभूत्॥ ४॥ ५ ७ ३

3

स॰ ९

दृढेति ॥ धर्मेण परिपालनेन वसुधाधिपत्ये दृढं यथा तथा महीं दत्तोऽपि दिगंतान् जितवानिति दत्ताद्दिगंत जितेन रघुणा यथा श्रियं

कांतिं अपुष्यत् ततः परं रघोरनंतरं अजेन च श्रियं अपुष्यत् ॥ तथैव अहीनपराक्रमं अन्यूनपराक्रमं अहीनः प्रचुरः

पराक्रमो यस्य अथवा अहीनां सर्पाणां इनस्य [illegible] स्वामिनः शेषस्येव पराक्रमो यस्येति अन्यून ननु किंत

दत्तादिगंत जिता रघुणा यथा श्रियमपुष्यदजेन ततः परं ॥ त

मधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमं ॥ ५ ॥

दशरथं इनं इनः सूर्ये प्रभौ चेति विश्वः स्वामिनं अधिगम्य पुनर्न बभाविति न किंतु बभावित्यर्थः द्वौ नत्रौ

प्रकृतिमर्थं गमयतः ॥ ५ ॥

८

समतयेति ॥ नराधिपो दशरथः समतया समदर्शित्वेन माध्यस्थेनेत्यर्थः वसुवृष्टेः धनवृष्टेः विसर्जनैः असतां दुष्टानां

नियमनात् निग्रहात् सवरुणौ वरुणसहितौ यम पुण्यजनेश्वरौ यम कुबेरौ वरुणान् यथासंख्यमनुययौ अनुचकार

चेति रुचा तेजसा अरुणाग्रसरं अनुरु सारथिं सूर्यं अनुययौ ॥ अनेन चक्रवर्तिनो दिग्पाल साम्यमस्तीति दर्शयति ॥ ६ ॥ तस्य

मा॰ समतया वसुवृष्टिविसर्जनैर्नियमनाद्सतां च नराधिपः ॥ अनुययौ यमपुण्यजने

श्वरौ सवरुणावरुणाग्रसरं रुचा ॥ ६ ॥ न मृगयाभिरतिर्न दुरोदरं न च शशिप्र

तिमाभरणं मधु ॥ न मुदयाय न वा नवयौवना प्रियतमा यतमानमपाहरत् ॥ ७ ॥

सेनासक्तिर्नो सीदित्याह नेति ॥ उदयाय यतमानं अभ्युदयार्थं व्याप्रियमाणं तं दशरथं मृगयाभिरतिः आ

खेटनव्यसनं नापाहरत् नाचकर्ष आखेटनं मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः ॥ द्यूतमासमंता

नुहरमस्येति दुरोदरं द्यूतं च नापाहरत् दुरोदरे द्यूतकारे पणे द्यूते दुरोदरमित्यमरः ॥ शशिनः प्रतिमा

५

प्रतिबिंबं आभरणं यस्य तत् अधुना पाद्दरत् नेदृ इति पदच्छेदः वा शब्दः समुच्चये न च यौवनाः प्रियतमाः वा स्त्रियश्च नापाहरन् अत्र मनुः पानमक्षाः स्त्रियश्चेति मृगया च यथाक्रमं एतत्कष्टतमं विद्यात् चतुष्कं कामजे गणे इति ॥ ७ ॥ नेति ॥ तेन राज्ञा प्रभवति प्रभौ सति वासवेनापि कृपणादीना वाक् नेरिता नोक्ता परि

न कृपणा प्रभवत्यपि वासवे न वितथा परिहासकथास्वपि ॥
अपि सपत्नजनेषु न तेन वागपरुषा परुषाक्षरमीरिता ॥ ८ ॥

हासकथास्वपि वितथा अनृता वाक् नेरिता किंच अपरुषा रोषशून्येन तेन सपत्नजनेष्वपि परुषाक्षरं नि ष्ठुराक्षरं यथा तथा वाक् नेरिता किमुतान्यत्रेति सर्वत्रापि शब्दार्थः किंतु अदीना सत्या मधुरैव वागुक्तेति फलितार्थः ॥ ८ ॥ श्रीगजाननप्रसन्न ॥ ॥ छ ॥

५१ उदयमिति ॥ वसुधाधिपाः राजानः उद्वहतीत्युद्वहो नायकः प्रचाप्रचुर रघूणामुद्वहः रघुनायकः तस्मात् रघूद्वहात् रघुना यकात् उदयं वृद्धिं अस्तमयं नाशं चेत्युभयं मानशिरे लेभिरे कुतः हि यस्मात् स दशरथो निदेशमाज्ञामलंघयतां नम्रा भ नं स्हृदयेष्विति सुहृत् मित्रम भूत् सुहृद् दुर्हृदौ मित्रामित्रयोरिति निपातः प्रतिगर्जतां प्रतिस्पर्द्धिनां अयः इव हृदयमस्य

उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः ॥ स हि निदेशमलंघयता
मभूत्सुहृदयोहृदयः प्रतिगर्जतां ॥ ९ ॥ अजयदेकरथेन स मेदिनीमुदधिनेमिम
धिज्यशरासनः ॥ जयमघोषयदस्य हि केवलं गजवती जवतीव्रहया चमूः ॥ १० ॥

स्त्यस्य योहृदयः कठिणचित्तोभूत् स्वाज्ञाकारिणां रक्षति अन्यान्मारयतीत्यर्थः ॥ ९ ॥ अजयदिति ॥ अधिज्यशरासनः स दशरथः उदधिनेमिं समुद्रवेष्टनां मेदिनीं एकरथेन अजयत् ॥ स्वयमेक एवाजैषीदित्यर्थः ॥ गजैर्वती गजैर्युक्ता जवे नतीव्राः जवाधिकाः हया यस्यां सा चमूः सेना तु अस्य नृपस्य केवलं जयमघोषयत् ॥ अप्रथयत् ॥ स्वयमेकाकिरिस्य चमूः

र॰पन

४

नु२

अवनिमिति॥ वरूथिनागुप्तिमतावरूथोरथगुप्तिर्यो तिरश्चस्थितमिति जनः एकरथेन अद्वितीयरथेन अवनिं
पृथ्वीं जितवतः धनुर्भृतः नरवाहनसंपदः कुबेरतुल्यश्रीर्यस्य तस्य दशरथस्य घनरवामेघस्य घोषा अर्णवाः
समुद्राः विजयदुंदुभितां ययुः अर्णवांतविजईद्दशरथस्यायमितिभावः॥११॥ शमितेति॥ पुरंदरः इंद्रः शत

अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः॥ विजयदुंदुभितां
ययुरर्णवा घनरवा नरवाहनसंपदः॥११॥ शमितपक्षबलः शतकोटिना शिखरि
णां कुलिशेन पुरंदरः॥ सशरवृष्टिमुचा धनुषा द्विषां स्वनवता नवतामरसाननः॥१२॥

कोटिना शतास्त्रिणा कुलिशेन वज्रेण शिखरिणां पर्वतानां शमितपक्षबलः येन शमितपक्षसारः नवतामरसाननः
नवपंकजतनुः पंकरुहं तामरसमित्यमरः॥ दशरथः शरवृष्टिमुचा स्वनवता धनुषा द्विषां शमितः पक्षः हायोनसं
चयेनसः तथोक्तः बलेपक्षः सहायेपीत्यमरः॥१२॥

८

चरणयोरिति॥ शतशो नृपतयः अखंडितपौरुषं तं दशरथं मरुतो देवाः शतमखं यथा शतक्रतुमिव नखरागेण चरणन
खकांत्या समृद्धिभिः संपादितर्द्धिभिः मुकुटरत्नमरीचिभिः चरणयोरस्पृशन् प्रणेमुरित्यर्थः॥१३॥ निववृत इति॥
सदशरथः सचिवैः संप्रयोजितैः कारिताः बालसुतानामंजलयो यैस्तान् स्वयंसमुखागतानित्यर्थः अनलकान्

चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन्॥ नृपतयः शतशो म
रुतो यथा शतमखं तमखंडितपौरुषं॥१३॥ निववृते स महार्णवरोधसः सचि
वकारितबालसुतांजलीन्॥ समनुकंप्य सपत्नपरिग्रहाननलकानलकानवमां पुरीं॥१४

हतभर्तृकतया अलकसंस्कारशून्यान् सपत्नपरिग्रहान् शत्रुपत्नीः पत्नीपरिजनादानमूलशापाः परिग्रहा इत्य
मरः समनुकंप्य अनुगृह्य अलकानवमां अलकानगरात् अन्यूनां पुरीम् अयोध्यां प्रति महार्णवानां रोधसः पर्यंता
न्निववृते शरणागतवत्सल इति भावः॥१४॥ ॥ छ॥ ॥श्री॥ छ

९

ट स ९
५

नलसो-

उपगतेति॥ अनुदितं अनुत्थितं अन्यत् तस्य छत्रान्तिरिक्तं सितातपवारणं श्वेतछत्रं यस्य सः॥ अनलसोमयोः अग्निसोमयोः समद्युति तेजः कान्तिर्यस्य स तथोक्तः स दशरथः श्रियं लक्ष्मीं रंध्रेण अन्यायालस्यादिरूपेण चलां चंचलाम् अवेक्ष्य श्रीर्हि व्यसनच्छिद्रेण पुमांसं परिहरतीत्यवलोक्य मंडलस्य नाभितां द्वादशराजमंडलस्य प्रधानमहीपतित्वं उपगतः अपि चक्रवर्तीसन्नपीत्यर्थः॥ अनलसो अभवत्॥

उपगतोपि च मंडलनाभितामनुदितान्यसितातपवारणः॥ श्रियमवेक्ष्य
स रंध्रचलामभूदनलसोनलसोमसमद्युतिः॥ १५ ॥ २

भिस्तु द्वादशराजकं यस्य संज्ञा प्रतारिका॥ रथचक्रस्य मध्यस्था पिंडिका याच वा पुनः॥ अयं क्षत्रियभेदेनु मंडलेषु मुख्यमहीपता वितिकेशवः॥ अभि तं नृपासन मस्तीति बुध्वा अनलसो अप्रमत्तोऽभूत् विजितनिखिलशत्रुरपि पुनश्छिद्रान्तरव्यानिवृत्तो जागरूक एवावतिष्ठत इत्यर्थः॥ द्वादशराजमंडलं तु कामंदकेनोक्तं॥ अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परं॥ तथारिमित्रमित्रं च विजिगीषोः पुरःसराः॥ पार्ष्णिग्राहस्ततः पश्चादाक्रंदस्तदनन्तरं॥ आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः॥ अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे॥ मंडलाद्बहिरेतेषामुदासीनो बलाधिकः॥ अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुरिति अमित्रादयः पंच विजिगी



षोः पुरःसराः पार्ष्णिग्राहाक्रंदौ पार्ष्णिग्राहासारः आक्रंदासारश्चेति पृष्ठतश्चत्वारः मध्यमोदासीनौ द्वौ विजिगीषुरेकः इत्येवं द्वादशराजमंडलं तत्रोदासीनमध्यमोत्तरश्चक्रवर्ती दशरथश्च एतादृक् इति तात्पर्यार्थः॥ १५॥ तमिति॥ पत्यौ व्रतं नियमो यस्याः सा पतिव्रता सा कमला कमलहस्तादेवता लक्ष्मीः अर्थिषु विषये अलाघवं लघुत्वरहितं अपराङ्मुख

तमपहाय ककुत्स्थकुलोद्भवं पुरुषमात्मभवं च पतिव्रता॥ नृप
तिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु॥ १६॥

मित्यर्थः ककुत्स्थकुलोद्भवं तं दशरथं आत्मभवं पुरुषं विष्णुं च अपहाय त्यक्त्वा अन्यं कं नृपतिं आसेवत कमपि नासेवतेत्यर्थः॥ विष्णाविव विष्णुतुल्ये तस्मिन्नपि श्रीः स्थिराभूदित्यर्थः॥ १६॥ ६॥ ॥ ६॥

स॰न

तमिति ॥ पतिरेव देवता यासां ताः पतिदेवताः पतिव्रताः मगधाश्च कोसलाश्च केकयाश्च तान् जनपदान् शासतीति तच्छासिनः
तेषां राज्ञां दुहितरः पुत्र्यः सुमित्राकौसल्याकैकेय्य इत्यर्थः ॥ अत्र क्रमो न विवक्षितः अहितेरोपितमार्गणं शत्रुनिखातशरं
कलंबमार्गणशरा इत्यमरः ॥ तं दशरथं शिखरिणां क्ष्माभृतां दुहितरः आसमंतात् अपगच्छंतीति वा ओघेन अपसृ

तमलभंत पतिं पतिदेवताः शिखरिणामिव सागरमापगाः ॥ मगधकोसलकेकय
त॰२ शासिनां दुहितरोऽहितरोपितमार्गणं ॥१७॥ प्रियतमाभिरसौ तिसृभिर्बभौ तिसृ त॰२ सो॰२
भिरेव भुवं सह शक्तिभिः ॥ उपगतो विनिनीषुरिव प्रजा हरिहयोऽरिहयोगविचक्षणः ॥१८॥

धिना वेगेन गच्छंतीति आपगा इति क्षीरस्वामी नद्यः सागरमिव तं पतिं भर्तारम् अलभंत ॥१७॥ प्रियतमाभिरिति ॥
अरीन् घ्नंतीति अरिहणो रिपुघ्न इति क्विप् ब्रह्मभ्रूणवृत्रेषु इति नियमस्य प्रायिकत्वात् यथाह न्यासकारः प्रा
यिकश्चायं नियमः क्वचिदन्यस्मिन्नप्युपपदे दृश्यते मधुहा प्रायिकत्वं च वक्ष्यमाणस्य बहुलग्रहणस्य पुरस्ता

९२

दपकर्षाल्लभ्यत इति ॥ तेषु योगेषु उपायेषु विचक्षणो दक्षः योगः संनहनोपायध्यानसंगतियुक्तिषु इत्यमरः इंद्रे
पियो ऽयमेतद्वत् असौ दशरथः तिसृभिः प्रियतमाभिः सह प्रजाः विनिनीषुः विनेतुमिच्छुः तिसृभिः शक्तिभिः प्र
भुमंत्रोत्साहशक्तिभिरेव सह भुवमुपगतो हरिहयः इंद्र इव जंभभेदी हरिहयः स्वाराण्णमुचिसूदन इत्यमरः

स किल संयुगमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः ॥ स्व
भुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभयाः शरैः ॥१९॥

स इति ॥ महारथः स दशरथः संयुगमूर्ध्नि रणांगणे मघवतः इंद्रस्य सहायतां प्रतिपद्य प्राप्य शरैः अवधूत
भयाः निवर्तितत्रासाः सुरवधूः उच्छ्रितम् उद्भटं स्वभुजवीर्यम् अगापयत किलेति खलु गायतेः ण्यंतकर्मत्वात् गतिबु
द्धीत्यादिना सुरवधूनामपि कर्मकत्वं ॥१९॥ ध व

र॰

क्रतुष्विति॥ क्रतुषु अश्वमेधेषु विसर्जितमौलिना अवरोपितकिरीटेन यावद्यज्ञमध्यस्थं रेवराजाभवतीति राज्ञश्चिन्ह
त्यागविधानादित्यभिप्रायः मौलिः किरीटधम्मिल्लू इति विश्वः भुजसमाहृतं तदिग्वसुना भुजार्जितदिगंतसंपदो
अनेन क्षत्रियस्याविजितमित्युक्तं नियमार्जितधनत्वं समाहृतीयोग कारित्वं सूच्यते वितमसा तमोगुणरहितेन

क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृताः ॥
कनकयूपसमुच्छ्रयशोभिनो वितमसा तमसासरयूतटाः ॥२०॥

तेन दशरथेन तमसा च शरयूश्च नद्यौ तयोस्तटाः कनकयूपानां समुच्छ्रयेण समुन्नयेन शोभिनः कृताः कनकमयत्वं
च यूपानां शोभार्थं विध्यभावात् हेमयूपस्तु शोभिक इति यादवः ॥२०॥



अजिनेति॥ ईश्वरः भगवान् षड्गुणैश्वर्यवान् तथोक्तं ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ज्ञानवैरा
ग्ययोश्चैव षण्णां भग इतीरणा इति वचनात् अष्टमूर्तिः अजिनं कृष्णाजिनं दंडं औदुंबरं च बिभ्रतीति अजिनदं
डभृतं कृष्णाजिनं दीक्षयतीति औदुंबरं दीक्षितदंडं यजमानाय प्रयच्छतीति वचनात् कुशैर्मेखला यस्यां

अजिनदंडभृतं कुशमेखलां यतगिरं मृगशृंगपरिग्रहां ॥
अधिवसंस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः ॥२१॥

तां कुशमेखलां शरमयी मौंजी वा मेखला तया यजमानं दीक्षयतीति विधानात् पक्षे कुशग्रहणं क्वाचित्कमिति नि
षिद्धदर्शनात् कृतां यतगिरं यतागीर्यस्यास्तां वाचं यच्छतीति श्रुतेः मृगशृंगपरिग्रहा कंडूयनसाधनं यासां तां कृष्णवि
षाणेन वा कंडूयते इति श्रुतेः अध्वरदीक्षितां संस्कारविशेषयुक्तां तनुं दाशरथीं अधिवसन् अधितिष्ठन् अस
मा भासो दीप्तयो यस्मिन् कर्मणि तत् यथा तथा अभासयत् भासयति स्म॥२१॥

र.म१
८

अवभृथेति॥ अवभृथेन यज्ञान्तस्नानेन नमयतः कृत्वतः विजितेन्द्रियः सुरसमाजसमाक्रमणोचितः देवसभाधिष्ठाना र्हः सद्दशरथः उन्नतं शिरः वनमुचेसलवर्षिणे जलनीरं नेचे सत्वभिनिशाश्वतः नमुचेररये केवलं मित्रायैव नमयति स्मन कस्मैचिदन्यस्मैमानुषायेनइत्यर्थः॥२२॥ असकृदिति॥ एकरथेन अद्वितीयरथेन नरास्विना बलवत्ताह

अवभृथप्रयतो नियतेन्द्रियः सुरसमाजसमाक्रमणोचितः॥ नमयतिस्म स केवलमुन्नतं वनमुचे नमुचेररये शिरः॥२२॥ असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृ ता॥ दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषां॥२३॥

रिहयस्येन्द्रस्याग्रसरेण धनुर्भृता तेन दशरथेन असकृत् बहुशः दिनकरस्य अभिमुखाः अभिमुखोत्थिता इत्यर्थः रणरेणवः सुरद्विषां दैत्यानां रुधिरेण रुरुधिरे निवारिताः॥२३॥ ७ ७



अथेति अथयमकुबेरजलेश्वरवज्रिणां धर्मराजधनदवरुणमहेन्द्राणां समाधुर्भारो यस्य सम धुरः माध्यस्थ वितरणसन्नियमनैश्वर्यैस्तुल्यकक्ष्य इत्यर्थः ऋक्पूरब्धूरित्यादिना अच समासान्तः तं समधुरं अंचितविक्रमं प्रशंसितपराक्रमं एकनराधिपं तं दशरथं सेवितुमिव मधुर्वसंतः मधुर्वसंते दैत्ये च चैत्रे पुष्परसे तिविश्वः नवैः कुसुमैः उपलक्षितः सन् समावर्तनं समागमतः स्निग्धनोपेयाद्राजानं दैवतां गुरुमि

अथ समावर्वृते कुसुमैर्नवैस्तमिव सेवितुमेकनराधिपं यमकुबेरजलेश्वरवज्रि णां समधुरं मधुरंचितविक्रमं २४ जिगमिषुर्धनदाध्युषितां दिशं रथयुजा प रिवर्तितवाहनः दिनमुखानि रविर्हिमनिग्रहैर्विमलयन्मलयन्नगमत्यजत् २५

तिवचनात् पुष्पसमेतो राजानं सेवितुमागत इतिभावः २४ जिगमिषुरिति धनदाध्युषितां कुबे राधिष्ठितां दिशं जिगमिषुः गंतुमिच्छुः रथयुजा सारथिना अनूरुणा परिवर्तितवाहनो निवर्तिताश्वः रविः हिमस्य निग्रहैः निराकरणैः दिनमुखानि प्रभातानि विमलयन् विशदयन् मलयं नगमत्यजाचलं

त नवम

कुसुमेति आदौ कुसुमजन्म ततो नवपल्लवाः तदनु अनुर्लक्षण इति कर्मप्रवचनीयत्वात् द्वितीया यथासं
ख्यं तद्भयानंतरं षट्पदानां कोकिलानां च कूजितमित्येवं प्रकारेण यथाक्रमं उक्तक्रमेण नतिक्रम्य
द्रुमवतीं द्रुमभूयिष्ठां वनस्थलीं अवतीर्य मधुर्वसंतः आविरभूत् केषांचिद् द्रुमाणां फलप्राथम्या

कुसुमजन्मततो नवपल्लवास्तदनु षट्पदकोकिलकूजितं इति यथाक्रम
माविरभून्मधुर्द्रुमवतीमवतीर्य वनस्थलीं २६ नयगुणोपचितामिव भू
पतेः सदुपकारफलां श्रियमर्थिनः अभिययुः सरसो मधुसंभृतां कमलिनीमे

त् केषांचित् कुसुमप्राथम्यात् नोक्तक्रमस्य दृष्टिविरोधः २६ नयेति नयो नीतिरेव गुणः अथ
वा नये न गुणैः शौर्यादिभिश्चानुपचितां सम्यक्पुष्टां नां सतां उपकारः फलं यस्यास्तां सदुपकारफ
लां भूपतेर्दशार अस्य श्रियं अर्थिन इव मधुना वसंतेन संभृतां सम्यक्पुष्टां सरसः संबंधिनीं कमलिनीं
पद्मिनीं अलिनी रपतत्रिणः अलयो भृंगाः नीरपतत्रिणो हंसादयश्चाभिययुः २७



कुसुममिति ऋतोरस्य प्राप्तमार्तवं ऋतुसंभवं ऋतोरणेत्यण् नवं प्रत्यग्रं अशोकतरोः केवलं कुसुममेव स्म
रस्य दीपनं न किंतु विलासिनां मदयिता मादकः दयिताश्रवणार्पितः किसलयप्रसवोपि पल्लवसंतानो
पि स्मरदीपनं २८ विरचिता इति मधुना वसंतेन उपवनश्रियां विरचिता अभिनवाः पत्रविशेष

कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदीपनं किसलयप्रसवोपि वि
लासिनां मदयिता दयिताश्रवणार्पितः २८ विरचिता मधुनोपवनश्रियामभि
नवा इव पत्रविशेषकाः मधुलिहां मधुदानविशारदाः कुरबका रवकारतां ययुः २९

काः पत्ररचना इव स्थिताः मधुनां मकरंदानां दाने विशारदाश्चतुराः कुरबकास्तरवः मधुलिहां मकर
रंदानां रवकारतां ययुः भृंगाः कुरबकानां मधु निपीय जगुरित्यर्थः दानशौंडान् अर्थिजनाः स्तुवंतीति
भावः २९

नवम
१०

रुचवदनाइति रुचवदनावदनासवेनकांतामुखमधेनसंभृतो। जनितः ततस्य दोहदमितिप्रसिद्धिः तस्य आ
मयस्यानुवादीसदृशोगुणोयस्यतदनुवादिगुणः कुसुमोद्गमः कर्ता मधुलोलुपैः आयतपंक्तिभिः दी
र्घपंक्तिभिः मधुकरैः मधुपैः बकुलं बकुलवृक्षं आकुलमकरोत् ३० उपहितमिति शिशिरापगमश्रिया

रुचवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गतः मधुकरैरकरोन्म टी १९
धुलोलुपैर्बकुलमाकुलमायतपंक्तिभिः ३० उपहितं शिशिरापगमश्रिया का
मुकुलजालमशोभतकिंशुके प्रणयिनीव नखक्षतमंडनं प्रमदयामदयापि

वसंतलक्ष्म्या किंशुके पलाशवृक्षे पलाशः किंशुकः पर्णं इत्यमरः उपहितं दत्तं मुकुलजालं कुड्म
लसंहतिः मदेनयापितलज्जयाअपसारितत्रपया प्रमदया प्रणयिनि प्रियतमे उपहितं नखक्षत
मंडनं तदिव अशोभत दिदीपे ३१ १८

व्रणेति॥ व्रणैर्दंतक्षतैः गुरु नितरांदुरैः प्रमदानामधरोष्ठैः दुःसहं हिमस्य व्यथाकरत्वात् आस
धंजघनेषु निर्विषयीकृता निरवकाशीकृता मेखलायेन तं तु शेत्या नैत्याजितमेखलमित्यर्थः
एवंभूतं हिमं रविस्नावतू आवसंतात् अशेषं निःशेषं यथातथा अपोहितुं निरसितुं नालं खलु
॥व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलं॥न खलु तावदशेष॥
॥मपोहितुं रविरलं विरलं कृतवान् हिमं ॥३२॥ अभियानुपरिच्चेत्तुमिवो द्य॥
॥ताम लयमारुतकंपितपल्लवा॥ अमदयत्सहकारलतामनः सकलिकाक
न्याकोहि किंतु विरलं कृतवानुतत्त्वचकार॥ ३२॥ अभिनयानिति॥ अत्रचूतलतानर्तकीसाम्य
मभिधीयते॥ अभिनयान् अर्थव्यंजकान् व्यापारान् व्यंजकाभिनयौ समावित्यमरः॥ परिचे
तुं अभ्यसितुं उद्यतेव स्थिताकुतः मलयमारुतेनकंपितपल्लवा पल्लवशब्देन हस्तोगम्यते॥ स

कलिकासकोरका कलिका कोरकः पुमानित्यमरः ॥ सद्वकारश्लेना कलिः कलहः कलहो द्वेषउच्यते ॥ कलिस्यात्कलहे शूरे कलिरंत्ययुगेषु धीतिविश्वः ॥ कामोरागः तज्जितामपिजितरागद्वेषाणामपीत्यर्थः ॥ मनः अमदयत् ॥ ३३ ॥ प्रथममिति ॥ सुरभिगंधिषों

प्रथममन्यभृताभिरुदीरिताः प्रविरलाइवमुग्धवधूकथाः
सुरभिगंधिषुशुश्रुविरेगिरः कुसुमितासुमितावनराजिषु ॥ ३४

सांतासुरभिगंधिषु गंधस्येतिइकारः कुसुमानिआसांसंजातानि कुसुमिताः तासु वनराजिषुवनपंक्तिषु अन्यभृताभिः कोकिलाभिः प्रथमंप्रारंभेषुउदीरिताःउक्ताः अतएवमिताः अपरिमिताः गिरः आलापाः प्रविरलाः मुग्धाः स्तोकोक्ताः मुग्धवधूनां

- 29 -     कथाः वाचइवशुश्रुविरेश्रुताः ३४ ॥

श्रुतीति सुरवाः कर्णमधुराः भ्रमरस्वना एवगीतयो यासांताः कुसुमान्येवकोमलदंतरुचोदंतकांतयोयासांताः अनेनसस्मितत्वंविवक्षितंउपवनांतलताः पवनेनआहतैः कंपितैः किसलयैः सलयैः साभिनयैः लयशब्देन लयानुगताभिनयोलक्ष्यते उपवनांतेपवनाहतैरितिसक्रियत्वाभिधानात् पाणिभिरिवबभुः रेजुः अनेनलतानां नर्तकीसाम्यंगम्यते ॥ ३५ ॥

श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकोमलदंतरुचोबभुः ॥ उपवनांत
लताः पवनाहतैः किसलयैः सलयैरिवपाणिभिः ॥ ३५ ॥ ललितविभ्रमबं
धविचक्षणंसुरभिगंधिपराजितकेसरं ॥ पतिषुनिर्विविशुर्मधुरांगनाः स्म
रसखंरसखंडनवर्जिताः ॥ ३६ ॥

रलितेति ॥ अंगनाः ललितविभ्रमबंधविचक्षणंमधुरविलासघटनापटुतरंसुरभिणामनोहरेणगंधेनपराजितकेसरंनिर्जितबकुलपुष्पंएतस्यकलिकागंधफलीस्यादथकेसरेबकुलइत्यमरः ॥ स्मरस्यसखायस्मरसखंस्मरोद्दीपकमित्यर्थः मधुंमद्यंअद्वेष्याःप्रसन्नचेतिप्रसि

नवम
८२

चेति पुंल्लिंगत्ता उत्कंठ्यम करंदरयम घस्य साक्षिकस्या पिवा चक्र: अर्द्धर्चादिगणे पाठात् पुंन्नपुंसकत्वे मधुरिति पनिषु विपर्यय रसखंडन वर्जितं अनुरागभंगरहितं यथा न था निर्विघ्नं परस्परानुरागपूर्वकं पतिभिः सह पपुरित्यर्थः ॥ ३६ ॥ शुशुभिरे इति ॥ विकचतामरसाः विकसित कमलाः मदेन कलोः अ

शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथसिंजितमेखलाः ॥ विक
चतामरसा गृहदीर्घिका मदकलोदकलोलविहंगमाः ॥ ३७ ॥

व्यक्त मधुर ध्वनंतः उदकलोलविहंगमाः जलप्रियपक्षिणो हंसादयो यासु ताः मदकलोदकलोल विहंगमाः गृहेषु दीर्घिकाः वाप्यः स्मितेन चारुतराणि आननानि यासां ताः श्लथाः सिंजिताः मुखराः या सां ताः सिंजितेति कर्तरि क्तः स्त्रिय इव शुशुभिरे ॥ ३७ ॥



उपययाविति मधुना मधुसमयेन खंडिता ह्यासंगमिनाक्षयितेन खलूत्तरायणे रात्रयः खंडिता स्थायाचना यका ध्वन्यते हिमकरोदयेन चंद्रोदयेन पांडुमुखस्य प्रदोषस्य वक्त्रस्येव छविर्यस्याः सा रजन्येव वधूः इ ष्टसमागमनिर्वृतिं प्रियसंगमसुखं अनिनयीः अप्राप्तया इण् धातोः कर्तरि क्तः वनितया सहशा तु सं तनु

उपययौ तनुतां मधुखंडिता हिमकरोदयपांडुमुखच्छविः सदृशमिष्टसमागमनिर्वृतिं
वनितयानितया रजनीवधूः ३८ अपतुषारतया विशदप्रभैः सुरतरागपरिश्रमनो
दिभिः कुसुमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनं ३९

तां न्यूनतां कार्श्यं च उपययौ ३८ अपतुषारेति हिमकरश्चंद्रः अपतुषारतया अपगतनीहारतया विशदप्रभैः निर्मलकांतिभिः सुरतरागपरिश्रमनोदिभिः सुरतसंगखेदहारिभिः अंशुभिः किरणैः मकरेण ऊर्जितं केतनं ध्वजो यस्य तं लब्धावकाशा बाहुच्छ्रितध्वजमित्यर्थः कुसुमचापं काममतेजयत् अशानयत् तेजनिशाने इति धातोर्ण्यंतात् लङ् सहकारिलाभात् कामोपि तीक्ष्णो भूदित्यर्थः ३९

ः नवम ३२

द्रुतेति द्रुतहुताशनदीप्तिः आह्लादिउज्वलितानि प्रभं यत्नकुसुमं कर्णिकारमित्यर्थः वनश्रियः
उपवनलक्ष्म्याः कनकाभरणस्य प्रतिनिधिरभूदित्यर्थः लिविशेषः दलेषु केसरेषु च पेशलं
सुकुमारपत्रकिंजल्कमित्यर्थः आद्दितां प्रियैरिति विशेषः नूतनकुसुमं युवतयः अलके

द्रुतहुताशनदीप्तिवनश्रियः प्रतिनिधिः कनकाभरणस्य यत् युवतयः कुसु
मं दधुराहितं तद्दलकेदलके सरपेशलं ४० अलिभिरंजनबिंदुमनोहरैः कु
सुमपंक्तिभिर्निपातिभिरंकितः नखलु शोभयतिस्मवनस्थलीं नतिलकस्तिलकः
प्रकुनलेषुदधुः ४० अलिभिरिति अंजनबिंदुमनोहरैः कज्जलकणसुंदरैः कुसुमपंक्तिषु नि
पतंतियेतैः अलिभिः अंकितः चिन्हितः तिलकः श्रीमान्नामवृक्षः तिलकः क्षुरकः श्रीमानित्य
मरः वनस्थलीं तिलकोपत्ररचनाविशेषकः तमालपत्रतिलकचित्रकाणि विशेषकं द्वितीयं च
तुरीयं च नस्त्रियामित्यमरः प्रमदामिव शोभयतिस्मेतिन अपितु शोभयदित्यर्थः लट्स्मेति स्मशब्दयोगा
त्भूतार्थेलट् ४१



अमदयदिति तरुचारुविलासिनीतरीपुंसः चारुविलासिनीव नवमल्लिका सप्तला स्यात् लता सप्तला
नवमल्लिकेत्यमरः मधुनोमकरंदस्य मद्यस्य च गंधिना सनाथया गंधप्रधानयेत्यर्थः किसलयमेव अधर
स्तत्रसंगतया प्रसक्तनरागयेत्यर्थः कुसुमैः संभृतया संपादितया कुसुमरूपयेत्यर्थः स्मितरुचा हास्यका
न्त्यामनः पश्यतामिति शेषः अमदयत् ४२ अरुणेति विलसंतीति विलसनशीलाः पुरुषाः वीक्षपल

अमदयन्मधुगंधिसनाथया किसलयाधरसंगतयामनः कुसुमसंभृतया नवमल्लि
कास्मितरुचा तरुचारुविलासिनी ४२ अरुणरागनिषेधिभिरंशुकैः श्रव
णलब्धपदैश्च यवांकुरैः परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ४३
पेव्यादिना घिनुण् प्रत्ययः अरुणस्य अनूरोः रागमारुण्यं निषेधंति तिरस्कुर्वंतीति अरुणरागनिषेधि
भिर्तैः कुंकुमादिरंजनात् तत्सदृशैरित्यर्थः तमन्वेत्यनुबध्नातितच्छीलं तन्निषेधंनिलस्यवानुकरोतिद्वति
शब्दः सादृश्यवाचकः इतिदंडी अंशुकैर्वस्त्रैः श्रवणेषु लब्धपदैः निवेशितैरित्यर्थः यवांकुरैश्च परभृताविरु
तैः कोकिलाकूजितैश्च इत्येतैः स्मरबलैः कामसैन्यैः अबलायां एकः रसो रागो येषां ते अबलैकरसाः स्त्रीप

नवम
१४

उपचितेति शुचिभिः शुभ्रैः कणैः रजोभिः उपचिताचयया पुष्टा वयया अलिकदंबकयोगमुपेयुषी प्राप्ता तिलकजाति तिलकवृक्षोत्थामंजरी अलके पुयत्नाजालकआभरणविशेषः तस्मिन्मौक्तिकैः सदृशा कांतिर लक्ष्यत भृंगसंसर्पिणी शुभ्रा तिलकमंजरी नीलालकासक्तमुक्ताजालमिवअलक्ष्यतेति वाक्यार्थः ४४

उपचिता चयवाशुचिभिः कणैरलिकदंबकयोगमुपेयुषी सदृशकांतिरलक्ष्यतमंज
रीतिलकजालकजालकमौक्तिकैः ४४ ध्वजपटं मदनस्य धनुर्भृतश्छविकरं मुखचू
र्णमृतुश्रियः कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ४५

ध्वजेति अलिव्रजाः मदनस्य कामस्य धनुर्भृतः धानुष्कस्य ध्वजपटं पताकाभूतं ऋतुश्रियः वसंतलक्ष्म्याः छ
विकरं शोभाकरं मुखचूर्णं मुखालंकारचूर्णीभूतं सपवनं यत् उपवनं तस्मिन् उत्थितं कुसुमानां केसरेषु
किंजल्केषु ये रेणुस्तमन्वयुः अन्वगच्छन्नूयातेर्लुङ् ४५

24

श्लोक त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ४७

अनुभवन्निति नवा दोला प्रेंखा यस्मिन् तं नवदोलम् उत्सवं वसंतोत्सवम् अनुभवन् अबलाजनः पटुरपि निपुणो
पि प्रियकंठस्य जिघृक्षया ग्रहीतुमालिंगितुमिच्छया आसनरज्जुपरिग्रहे भुजलतां बाहुलतां जलतां जडतां
शैथिल्यं डलयोरभेदः शिथिलतामित्यर्थः अनयत् दोलाक्रीडासु पतनभयनिमित्तकेन प्रियकंठमाश्लिष्य

अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकंठजिघृक्षया अनयदासनरज्जुपरिग्रहे
भुजलतां जलतामबलाजनः ४६ ~~अथयथासुखमार्तवमुत्सवं समनुभूय विलासवतीसि~~
~~स्वः भरस्पतिश्चकमे मृगयारतिं समधुसन्मधुमन्मथसन्निभः ४८~~
दित्यर्थः ४७ त्यजतेति बतेत्यामंत्रणे विस्मयामंत्रणे बत्यमरः बत अंगनाः मानं कोपं त्यजत स्त्रीणामीर्ष्याकृ
तः कोपो मानोन्यासंगो नि प्रियद्वत्यमरः विग्रहैः विरोधैरलं विग्रहो न कार्य इत्यर्थः गतमिति चतुरमुपभोगक्षमं
वयो यौवनं पुनर्नैति न गच्छतीत्येवंरूपे स्मरमते स्मराभिप्रायेण पुंस्कोकिलैः परभृताभिः कोकिलाभिः निवे

25

नवम
१९

दितेसति यधूझनोरमनेस्मरेमे कोकिलाकूजितोद्दीपकस्मरः स्त्रीजनः कामशासन भयादिवोपकृस्वल ह्वित्यर्थः ४७
अथेति अथानंतरंमधुमथ्नातीतिमधुमधुमद्विष्णुः संपदादित्वात् क्विप्मधुर्वसंतः मथ्नातीतिमथः पचाद्यच् मनसः
मथः मन्मथः तेषांसन्निभः सदृशः मधुमन्मधुमन्मथसंनिभः नरपतिर्दशरथः विलासवतीसखः स्त्रीसहचरः सन्

अथयथासुखमार्तवंसमनुभूयविलासवतीसखः नरपश्चेतिकमेमृगयारतिंसमधुम
न्मधुमन्मधुसंनिभः ४८ परिचयंचललक्ष्यनिपातनेभयरुषोश्चतदिंगितबोधनं
श्रमजयात्प्रगुणांचकरोत्यसौतनुमतोनुमतासचिवैर्ययौ ४९

ऋतुं प्राप्तोत्यार्तवः तंउत्सवंवसंतोत्सवंयथासुखसमनुभूयमृगयारतिंमृगयाविहारंचकमेअवकांक्ष ४८ व्यसनासं
गदोषपरिहरन्नाहपरिहृचयमिति असौमृगयाचललक्ष्याणिमृगगवयादीनितेषांनिपातनेपरिचयंअभ्यास
नंचकरोतितनुंशरीरंश्रमस्यजयान्निरासात्प्रगुणाप्रकृष्टलाघवादिगुणवतींचकरोतिअतःहेतोःस

२८

चिवैरनुमतोययौसर्वचैनन्नुयुद्धोपयोगीअतस्तदपेक्षयामृगयाप्रवृत्तिर्नतुव्यसनितयेतिभावः ४९ मृगेति
मृगाणांवनंतस्योपगमःप्राप्तिःतत्रक्षमंअर्हंवेषंबिभर्तीतिसतथोक्तः मृगयाविहारानुगणवेषधारीत्यर्थः विपुल
कंठेनिषक्तशरासनोलग्नधन्वानासवितेववसवितापुरुषश्रेष्ठःउपमितसमासः सराजाअश्वखुरोद्धतरेणुभिःग

मृगवनोपगमक्षमवेषभृद्विपुलकंठनिषक्तशरासनः गगन
मश्वखुरोद्धुतरेणुभिर्नृसवितासवितानमिवाकरोत् ५०

गनंवितानंतुच्छंअसदिवाकरोत्गगनंनालक्ष्यतेत्यर्थः वितानंतुच्छमंदयोरितिविश्वः अथवासवितानमिसेकंप
दंसवितानंउल्लोचसहितमिवाकरोत्अस्त्रीवितानमुल्लोचइत्यमरः ५० छ छ छ

30

नवम
९७

ग्रथितेति वनमालया वनपुष्पस्रजा ग्रथितमौलिः बद्धधम्मिल्लः तरूणां पल्लवैः पत्रैः सवर्णसमानः तनुच्छदो य
म्यस्य तत्तथोक्तः इदं च वर्मणः पल्लवसावर्ण्याभिधानं मृगादीनां विश्वासार्थं तुरगस्य वल्गनेन गतिविशेषे
ण चंचलकुंडलो सौ दशरथः रुरुभिर्मृगविशेषैः। चेष्टिता अध्यासिता या भूमयस्तासु विरुरुचे बिदिद्युते ५१

ग्रथितमौलिरसौ वनमालया तरुणपल्लवसवर्णतनुच्छदः तुरगवल्गनचंचलकुंडलो
विरुरुचे रुरुचेष्टितभूमिषु ५१ तरुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षण
वृत्तयः ददृशुरध्वनि तं वनदेवताः सुनयनं नयनंदितकोसलं ५२

तरुलतेति तरुषु लतासु विनिवेशिता विग्रहाः संक्रमितास्थानः भ्रमरेषु संक्रमिता ईक्षणवृत्तयो दृग्व्यापा
रा यासां ताः वनदेवताः सुनयनं सुलोचनं नयनेन नीत्या नंदितास्तोषिताः कोसला येन तं दशरथं अध्वनि
मार्गे ददृशुः प्रसन्नपावनतया तं देवता अपि गूढवृत्त्या ददृशुरित्यर्थः ५२

31

चरंतीति ठक् २

श्वगणीति स दशरथः शुनां गणः श्वगणः स एषामस्तीति श्वगणिनः श्वग्राहिणः तैः वागुरा मृगबंधनरज्जुः वा
गुरा मृगबंधनी इत्यमरः तया चरंतीति वागुरिकाः जालिकाः द्वौ वागुरिकजालिकाविति अमरः तैश्च प्रथम
मास्थितमधिष्ठितं व्यपगता अनलाः दावाग्नयो दस्यवस्तस्कराश्च यस्मात्तत्तथोक्तं दस्युतस्करमोषकाइत्य

श्वगणवागुरिकैः प्रथमं स्थितं व्यपगतानलदस्यु विवेश सः स्थिर
तुरंगमभूमिनिपानवन्मृगवयोगवयोपचितं वनं ५३

मरः कार्ये इनविशो धनमादौ आतुरं निकमिति प्रविविक्षुः आसन्नाश्वानुगतः प्रविशी इदासंकटे च गहनेच न
तिष्ठदिति कामंदकेनोक्तं स्थिरा दृढा पांकादि रहिता तुरंगमयोग्या भूमिर्यस्य तत् निपानवत् आहावयु
क्तं आहावस्तु निपानं स्यादुपकूपजलाशये इत्यमरः मृगैः हरिणादिभिः वयोभिः पक्षिभिः गवयैः गोस
दृशैः अरण्यपशुविशेषैश्च उपचितं समृद्धं वनं विवेश ५३ ४ ६ ७ ६

32

-नवम
९७

अथेति अनाधिः मनोव्यथारहितः नरेषु वरः श्रेष्ठः रवेण धनुष्टंकारेण रोषिताः केसरिणः सिंहाः येन स नरवरोरवरोषितकेसरी कनकमिव पिंगः पिशंगो यस्तडिदेव गुणो मौर्वी तेन संयुतं संयुक्तं त्रिदशायुधं इंद्रचापं नभस्यो भाद्रपदो भाद्रपदाः समाः इत्यमरः भाद्रपदमासइव स्थूलनभस्यः अधिज्यमारोपितमौर्वीकं धनुरादद उपाददे ५४ तस्येति स्तनप्र

अथ नभस्य इव त्रिदशायुधं कनकपिंगतडिद्गुणसंयुतं धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ५४ तस्य स्तनप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् आविर्बभूव कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृष्णसारं ५५

णयिभिः स्तनप्रार्थिभिः एणशावैः हरिणशिशुभिः पृथुकः शावकः शिशुरित्यमरः व्याहन्यमानं हरिणीनां गमनं गतिर्यस्मिन् तत् कुशाः गर्भे येषां तानि मुखानि यस्य तत् कुशगर्भमुखं तस्य यूथस्य अग्रसरः पुरःसरः गर्वितः दृप्तः कृष्णसारो यस्य तन्मृगाणां यूथं कुलं सजातीयैः कुलं यूथं तिरश्चां पुंन्नपुंसकमित्यमरः तस्य दशरथस्य पुरस्तात् अग्रे आविर्बभूव ५६

33

तदिति जवनो जवनशीलः जुचंक्रम्येत्यादिना युच् प्रत्ययः तरस्वी त्वरितो वेगी प्रजवी जवनो जवीत्यमरः तं वाजिनमश्वं गतेन आरूढेन तूणीइषुधिः बह्वादिभ्यश्चेति स्त्रियां ङीष् तस्याः मुखात् विवरात् उद्धृत शरेण राज्ञा प्रार्थितमभि

तत्प्रार्थितं जवनवाजिगतेन राज्ञा तूणीमुखोद्धृतशरेण विशीर्णपंक्तिः
श्यामीचकार वनमाकुलदृष्टिपातैर्वातेरितोत्पलदलप्रकरैरिवार्द्रैः ५६

यातं यांचायामभियानेन प्रार्थनाकथ्यते बुधैरिति केशवः अत एव विशीर्णा पंक्तिः संधिभावो यस्य तन्मृगयूथं कर्तृ आर्द्रैः भयाद्रश्रुसिक्तैः आकुलैः भयचकितैः दृष्टिपातैः वातेरितैः पवनप्रेरितैः उत्पलदलप्रकरैरिंदीवरदलवृंदैः अभङ्गवत् वनं श्यामीचकार ५७

38

नवम
८

लक्षीकृतस्येति हरिरिंद्रो विष्णुः वा तस्येव प्रभावो यस्य सः धन्वी धनुष्मान् स नृपो लक्षीकृतस्य वेद्धुमिष्टस्य हरिणस्य स्वप्रेयसो देहं व्यवधाय अनुरागाद्दंतर्धाय स्थितां सहचरतीति सहचरी तां प्रपश्य नादित्वे चरते ष्टि करणात् ङीप् यथाह वामनः अनुचरतीति चरते ष्टित्वादिति सहभूतां सहरीं हरिणीं प्रेक्ष्य कामिन

लक्षीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहं
आकर्णकृष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार ५७

या स्वयं कामुकत्वात् कृपामृदुमनाः करुणार्द्रचित्तः सन् आकर्णकृष्टमपि दुः प्रतिसहरमपीत्यर्थः बाणं प्रतिसंजहार निपुणत्वादित्यर्थः नैपुण्यं धन्वीत्यनेन गम्यते ५७



तस्येति त्रासात् भयात् अतिमात्रचपदुलैः अत्यंतचंचलैः सुनेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि चतुरकांतानां विलोचनविलासव्यापारान् स्मरयतः साहश्याद् स्मरयतः अपरेष्वपि मृगेषु शरान्मुमुक्षोः तस्य नृपस्य कर्णांतमेत्य निविडोपि दृढोपि मुष्टिः विभिदे स्वयमेव भिद्यते स्म भिदेः कर्मकर्तरि लिट् कामिनः तस्येति

तस्यापरेष्वपि मृगेषु शरान्मुमुक्षोः कर्णांतमेत्य विभिदे निविडोपि मुष्टिः त्रासातिमात्रचटुलैः
स्मरयतः सुनेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि ५८ उत्तस्थुषः शिशिरपल्वलपंक
मध्यात् मुस्ताप्ररोहकवलावयवानुकीर्णं जग्राह स द्रुतवराहकुलस्य मार्गं व्यक्तं

या विभ्रमः स्मृतिजनितकृपातिरेकात् मुष्टिभेदो न तु नैपुण्यादिति तात्पर्यं ५८ उत्तस्थुष इति सः नृपः मुस्ताप्ररोहाणां मुस्तांकुराणां कवलाः ग्रासाः तेषां अवयवैः भ्रमविवृत्तमुखभ्रंशिभिः शकलैः अनुकीर्णं व्याप्तं आयताभिः दीर्घाभिः आर्द्रपदपंक्तिभिः व्यक्तं शिशिरपल्वलपंकमध्यात् उत्तस्थुषः उत्थितस्य द्रुतवराहकुलस्य पलायितवराहयूथस्य मार्गं जग्राह अनुससार ५९

नयम
९१

तं वाहनादिति वराहाः वाहनादश्वात् ईषदवनतोत्तरकायं किंचिदवनतोत्तरकायं विध्यंतं प्रहरंतं उद्धृतसटाः ऊ
र्ध्वकेसराः संतः सटा जटा केसरयोरिति विश्वः प्रतिहंतुमीषुः प्रतिहंतुमैच्छन् अस्य नृपस्य इषुभिः
सहसा जघनानां आश्रयेषु अवष्टंभेषु वृक्षेषु विद्धमात्मानं न विविदुः एतेन वराहाणां मनस्वित्वं नृप

तं वाहनादवनतोत्तरकायमीषद्विध्यंतमुद्धृतसटाः प्रतिहंतुमीषुः नात्मा
नमस्य विविदुः सहसा वराहा वृक्षेषु विद्धमिषुभिर्जघनाश्रयेषु ६०

स्य हस्तलाघवं चोक्तं ६० तेनेति अभिघातेन रभसः औत्सुक्यं यस्य तस्य अभिहंतुमुद्यतस्येत्य
र्थः वन्यस्य वने भवस्य महिषस्य नेत्रविवरे नेत्रमध्ये तेन नृपेण विकृष्य आकृष्य मुक्तः पत्री शरः वि
ग्रहं महिषदेहं निर्भिद्य विदार्य अशोणितलिप्तो न भवतीत्यशोणितलिप्तपुंखो यस्य स तथोक्तः सन्

37

36

तं महिषं प्रथमं पातयामास स्वयं पश्चात् पपात अत्र पातयामासेति प्रयुज्यते नेति दीक्षितः अनुप्रयोगस्य व्यवहि
तेविपर्ययस्य प्रयोगनिवृत्त्यर्थत्वात् पातयां प्रथममासेत्यपप्रयोग इति पाणिनीयः यथा ह वार्त्तिककारः
विपर्यासनिवृत्त्यर्थं वा व्यवहितनिवृत्त्यर्थं चेति ६१ प्राय इति नृपतिः निशितैः क्षुरप्रैः शर

तेनाभिघातरभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः निर्भिद्य विग्रहमशोणि
तलिप्तपुंखस्तं पातयां प्रथममास पपात पश्चात् ६१ प्रायो विषाणपरिमोक्षलघूत्तमांगान्
खड्गांश्चकार नृपतिर्निशितैः क्षुरप्रैः शृंगं स दृप्तविनयाधिकृतः परेषामत्युच्छ्रितं न ममृषे न तु दी

विशेषैः खड्गान् मृगान् गंडके खड्गखड्गिनावित्यमरः प्रायो बाहुल्येन विषाणपरिमोक्षेण शृंगभंगेन
लघूनि अग्ररूपाणि उत्तमांगानि शिरांसि येषां तान् चकार न त्ववधीदित्यर्थः कुतः दृप्तविनयाधि
कृतः दुष्टनिग्रहनियुक्तः राजा परेषां प्रतिकूलानां अत्युच्छ्रितं उन्नतं शृंगं विषाणं प्राधान्यं वा शृंगं प्रा
धान्यसान्वोरित्यमरः न ममृषे न सेहे दीर्घमायुः जीवितकालं न ममर्षेति न किंतु ममर्ष एवेत्यर्थः ६२

नवम
२०

व्याघ्रानिति अभीः निर्भीकः सः राजा गुहाभ्यो अभिमुखं संमुखं उ ऋतितान् आगतान् वानेन वाधु नारुणान् पुष्पः विकसिताः ये आसनस्य सर्जवृक्षस्य अग्रे चिटपास्तानि यस्खितान् इषुधिभृ तानित्यर्थः व्याघ्राणां चित्ररूपत्वात् उपमानं पुष्पविशेषणं अनुपसर्गान् पुष्पशी वञ्च शीला

व्याघ्रान् भीरभिमुखोत्पतितान् गुहाभ्यः फुल्लासनाग्रविटपानिव वानरुणान्
शिक्षाविशेषलघुहस्ततया निमेषात् तूणीचकार शरपूरितवक्त्ररन्ध्रान् ६३

घाइति निष्ठा टकारस्य टत्वं निपातः सर्जकासनबंधूकपुष्पप्रियकजीवका इत्यमरः शरैः पूरिता नि वक्त्ररंध्राणि येषां तान् व्याघ्रान् शिक्षाविशेषेण अभ्यासातिशयेन लघुहस्ततया क्षिप्रहस्त तया निमेषात् तूणीचकार तूणापूरं पूरितानित्यर्थः ६३ ७ ६७ ७

३९

निर्घातेति कुंजेषु लीनान् निकुंजकुंजौ वा क्लीबे लतादिपिहितोदर इत्यमरः सिंहान् जिघांसुः हन्तुमि च्छुः निर्घातो व्योमोत्थितः औत्पातिकः शब्दविशेषः तद्वद् उग्रैः ज्यानिर्घोषैः रौद्रैः मौर्वीशब्दैः क्षोभ यामास अत्रोत्प्रेक्ष्यते नेतेषां सिंहानां संरब्धानि वीर्येण उदग्रेषु अन्न मृगेषु विषये यो राजशब्दस्य

निर्घातोग्रैः कुंजलीनान् जिघांसुर्ज्यानिर्घोषैः क्षोभयामास सिंहान्
नूनं नेषामभ्यसूयापरोऽभूद् वीर्योदग्रे राजशब्दे मृगाणां ६४

स्मिन् अभ्यसूयापरः अभूत् नूनं अन्यथा कथमेतान् अन्विष्य हन्यादित्यर्थः मृगाणामिति पाठे समा से गुणभूतत्वात् राजशब्देन संबंधो दुर्घटः शालीनवृत्तमेतत् ६४ ३ ७ ३ ७

४०

र॰नव ४१

तानिति काकुत्स्थो रघुः गजकुलेषु बद्धं तीव्रं वैरं यैस्तान् कुटिलेषु नखाग्रेषु लग्नाः मुक्ताः गज
कुंभमौक्तिकानि येषां तान् सिंहान् हत्वा आत्मानं रणेषु कृतकर्मणां कृतोपकाराणां गजानामा
नृण्यं अनृणत्वं मार्गणैः शरैः मार्गणो याचके शरे इति विश्वः गतं प्राप्तमिव अमंस्त मेने ६५

तान् हत्वा गजकुलबद्धतीव्रवैरान् काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् आत्मानं रणकृत
कर्मणां गजानामानृण्यं गतमिव मार्गणैरमंस्त ६५ चमरान् परितः प्रवर्तिताश्वः क्वचि
दाकर्णविकृष्टभल्लवर्षी नृपतीनिव तान् जगाम शांतिं सितवालव्यजनैर्वियोज्य सद्यः ६६

चमरानिति क्वचिच्चमरान् परितः अभितः परित इत्यादिना द्वितीया प्रवर्तिताश्वः प्रधाविताश्वः
आकर्णविकृष्टान् भल्लान् इषुविशेषान् वर्षतीति तथोक्तः स नृपो नृपतीनिव तान् चमरान् सि
तवालव्यजनैः शुभ्रचामरैः वियोज्य विहीकृत्य सद्यः शांतिं जगाम शूराणां परकीयमैश्वर्यमेव अस
ह्यं न तु जीवनमिति भावः औपच्छंदसिकं वृत्तं ६६



अपीति स नृपः तुरगसमीपात् उत्पतंतमपि सुप्रहरमपीत्यर्थः रुचिरकलापं भासुरबर्हं मत्वा मनसि रोचतीति मयूरः बर्हि
णः पृषोदरादित्वात् साधुः चित्रेण माल्येन अनुकीर्णे रत्यां विगलितबंधे प्रियायाः केशपाशे सपदि गतमनस्कः
प्रवृत्तचित्तः उरःप्रभृतिभ्यः कप् इति कप्प्रत्ययः न बाणलक्ष्यीचकार न प्रजहारेत्यर्थः ६७

अपि तुरगसमीपादुत्पतंतं मयूरं न स रुचिरकलापं बाणलक्ष्यीचकार सपदिग
तमनस्कः चित्रमाल्यानुकीर्णे रतिविगलितबंधे केशपाशे प्रियायाः ६७ तस्य
कर्कशविहारसंभवं स्वेदमाननविलग्नजालकं आचचाम सतुषारसीकरो भि
न्नपल्लवपुटो वनानिलः ६८

तस्येति कर्कशविहारात् दृढव्यायामात् संभवो यस्य तं आनने विलग्नजालकं बंधकदंबकं तस्य नृपस्य
स्वेदं सतुषारसीकरः शिशिराम्बुकणसहितः भिन्नाः निर्दलिताः पल्लवानां पुटाः कोशाः येन सः वनानिलः
आचचाम जहारेत्यर्थः रथोद्धतावृत्तमेतत् ६८

नवम इतीति इति आत्मनो विस्मृतमन्यत् अनुकरणीयं कार्यं येन तं विस्मृतान्यकार्यांतरमित्यर्थः सचिवैरवलंबिता
७२ धूः नाभ्यर्यस्य तं ऋक्पूरब्धूरित्यादिना अच् प्रत्ययः समासांतः अनुबंधसेवया संततसेवया परिवृद्धो रागो
यस्य तं नराधिपं मृगया इति मृगया परिचर्या मृगया दीनामुपसंख्यानमिति शप्रत्ययांतो निपातः

इति विस्मृतान्यकरणीयमात्मनः सचिवावलंबितधुरं नराधिपं परिवृद्धरागमनुबंधसेवया मृग
या जहार चतुरेव कामिनी ६९ सललितकुसुमप्रवालशय्यां ज्वलितमहौषधिदीपिका
सनाथां नरपतिरतिवाहयांबभूव क्वचिदसमेतपरिच्छदस्त्रियामां ७०

चतुरा विदग्धा कामिनी वजेहार आचकर्ष वशीचकार जातु कामः कामानामुपभोगेन न शाम्यतीति भावः
सुमलीवृत्तमेतत् ६९ सललितेति स नृपतिः सुललितानि कुसुमानि प्रवालानि पल्लवानि शय्या
यस्यां तां ज्वलिताभिर्महौषधिभिरेव दीपिकाभिः सनाथां तत्संधानात् सदीपामित्यर्थः त्रियामां रात्रिं क्व
चिदसमेतपरिच्छदः परिहृतपरिजनः सन्नित्यर्थः अतिवाहयांबभूव गमयामास पुष्पिताग्रा वृत्तमेतत्



उषसीति उषसि प्रातः पटूनां पटहानामिव ध्वनिर्येषां तैः गजयूथानां कर्णैरेव तालैः वाद्यभेदैः विनीतनि
द्रः स नृपतिः तत्र वने मधुराणि विहंगानां विकूजितान्येव बंदीनां मंगलानि मंगलगीतानि शृण्वन्
अरमत ७१ अथेति अथ जातु कदाचित् रुरोर्मृगस्य गृहीतवर्त्मा स्वीकृतरुरुमार्गः विपिने व

उषसि स गजयूथकर्णतालैः पटुपटहध्वनिभिर्विनीतनिद्रः अरमत मधुराणि
शृण्वन् विहगविकूजितवंदिमंगलानि ७१ अथ जातु रुरोर्गृहीतवर्त्मा विपिने पा
र्श्वचरैरलक्ष्यमाणः श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरंगमेण ७२

ने पार्श्वचरैरलक्ष्यमाणः तुरंगवेगादित्यर्थः श्रमेण फेनमुचा सफेनाविद्यत इत्यर्थः तुरंगमेण त
पस्विभिः गाढां अवगाढां सेवितां तमसां नाम नदीं सरितं प्राप ७२

नवम ७३

कुंभेति तस्याः तमसायाः अंभसि कुंभपूरणेन भवः उत्पन्नः पटुः स्पष्टः उपदुमधुरः उच्चैः गंभीरः निनदः ध्वनिः उच्चचार उदीयाय यदुनिनदं सन्नृपः द्विरदबृंहितं तेन शंकत इति द्विरदबृंहितशंकी सन् शब्दे नेशब्दानुसारेण पततीति शब्दपातिनमिषुं विससर्ज चैस्यागतावभमे मेनन् ७३ नृपतेरिति

कुंभपूरणभवः पटुरुच्चैरुच्चचार निनदोंभसि तस्याः तत्र स द्विरदबृंहितशंकी शब्दपातिनमिषुं विससर्ज ७३ नृपतेः प्रतिषिद्धमेव यत्कृतवान्पंक्तिरथो विलंघ्य तत् अपथे पदमर्पयंति हि श्रुतवंतोपि रजोनिमीलिताः ७४

यत्कर्म नृपतेः क्षत्रियस्य प्रतिषिद्धं अकरणीयमेव तत् कर्म गजवधरूपं पंक्तिरथो दशरथो विलंघ्य अतिक्रम्य अविचार्य लक्ष्मीकामो युद्धादन्यत्र करीवधः न कुर्यादिति शास्त्रमुल्लंघ्य कृतवान् ननु विदुषस्तस्य कथमीदृक् विचेष्टितमित्याशंक्याह अपथ इति श्रुतवंतोपि विद्वांसो



सोपि रजोनिमीलिताः रजोगुणावृत्ताः संतः नपंथानुस्यपथं पथो विभाषेति वा समासांतः अपथं नपुंसकमिति नपुंसकत्वं अपंथास्त्वपथं तुल्यमित्यमरः तस्मिन् अपथे अमार्गे पदं अर्पयंति हि निक्षिपंति हि प्रवर्तत इत्यर्थः वैतालीयं वृत्तं ७४ हा तातेति हे तात हा तात जनकः हा विषादे

हा तातेति क्रंदितमाकर्ण्य विषण्णस्तस्यान्विष्यन्वेतसगूढं प्रभवं सः
शल्यप्रोतं प्रेक्ष्य स कुंभं मुनिपुत्रं तापादंतःशल्य इवासीत्क्षितिपोपि ७५

रुग्गर्निषु तात तु जनकः पितेति त्रुभयत्राप्यमरः हा तातेति क्रंदितं क्रोशनमाकर्ण्य विषण्णो भग्नोत्साहः सन् तस्य क्रंदितस्य यो वेतसैः गूढः छन्नः प्रभवत्यस्मादिति प्रभवः कारणं तं अन्विष्यन् शल्येन शरेण प्रोतं स्यूतं शल्यं शंकी शरेण विद्ध इति निश्चयः स कुंभं मुनिपुत्रं प्रेक्ष्य स क्षितिपोपि तापाद्दुःखात् अंतः शल्यं यस्य सोंतः शल्य इवासीत् विमनाः मग्न इत्येतत् ७५

नवम
१४

तेनेति प्रथितान्वयेन प्रख्यातवंशेन पापभीरुत्वं सूचितं तेन राज्ञा तुरगात् अवतीर्य पृष्टान्वयो ब्रह्महत्या
शङ्कया पृष्टकुलो जलकुम्भनिषण्णदेहः स मुनिपुत्रः तस्मै राज्ञे स्खलद्भिः अक्षरपदैः अक्षराङ्कितैर्वाग्जा
तु अर्द्धोच्चारितैरित्यर्थः आत्मानं द्विजेतरश्चासौ तपस्विसुतश्च द्विजेतरतपस्विसुतस्तं कथयाम्बभूव

तेनावतीर्य तुरगात् प्रथितान्वयेन पृष्टान्वयः स जलकुम्भनिषण्णदेहः
तस्मै द्विजेतरतपस्विसुतं स्खलद्भिरात्मानमक्षरपदैः कथयाम्बभूव ७६

न तावत् ऋषिवर्णिक इवाहमस्मि किंतु करणः वैश्यात् करणः शूद्र्यामिति याज्ञवल्क्यः कुतो ब्रह्म
हत्येत्यर्थः तथा च रामायणे ब्रह्महत्याकृतं पापं हृदयादपनीयतां न द्विजातिरहं राजन्मा भूत्ते मन
सो व्यथा शूद्र्यायामस्मि वैश्येन जातो जनपदाधिपेति ७६ ५ ५ ३



तदिति तच्चोदितः तेन पुत्रेण चोदितः पितृसमीपं प्रापयेत्युक्तः सन् नृपतिः अनुद्धृतशल्यं अनुत्पाटितशरमेव तं मुनिपुत्रं अवसन्नदृशोः नष्टचक्षुषोः अक्षयोरित्यर्थः पित्रोः मातापितरौ पितामात्रेत्येकशेषः
सकाशं समीपं निनाय इदं च रामायणविरुद्धं अथाहमेकः संदेशं नीत्वा तौ भृशदुःखितौ अस्याशायमहं

तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय
ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं नृपतिः शशंस ७७

पुत्रं तं मुनिं सह भार्ययेति तत्र नदीतीर एव मृतपुत्रं प्रति पितरौ आनयनाभिधानात् तथागतं वेतसय
ढं एकश्चासौ पुत्रश्च तमेकपुत्रं एकग्रहणं पित्रोरनन्यगतित्वसूचनार्थं तं मुनिपुत्रं उपेत्य सान्निध्य
अज्ञानतः करिभ्रान्त्या स्वचरितं स्वकृतं ताभ्यां पितृभ्यां क्रियाग्रहणाच्चतुर्थी शशंस कथितवान् ७७

नवम तावितिः तौ जाया च पतिश्च दंपती राजदंतादिषु परमिति जायाशब्दस्य दंभावः जंभावश्चाविकल्पेन निपातनः
९५ दंपती जंपती जायापती भार्यापती च तौ इत्यमरः बहु विलप्य परिदेव्य शिशोः उरस्तः वक्षसः पंचम्या
स्तसिल् निखातं शल्यं प्रहर्त्रा राज्ञा उद्धारयतां उद्धारयामासतुः स शिशुः परासुः अभूत् अथ वृ

तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः
सोऽभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः ७८

द्धो हस्तयोः अर्पितैः नयनवारिभिः एव शापदानस्य जलपूर्वकत्वात् तैरेव भूमिपतिं शशाप ७८

४८

दिष्टांतमिति हे राजन् भवानपि अंते वयसि अहमिव पुत्रशोकात् दिष्टांतं कालावसानं मरणमित्यर्थः दि
ष्टकाले चदैवे स्यादिष्टिरिति विश्वः अप्रुस्यसि प्राप्स्यसीत्युक्तवंतं आक्रांतः पादाहतः पूर्वं आक्रांत पूर्वो
सुपसुपेति समासः तं प्रथममपकृतमित्यर्थः मुक्तविषं अपकारिणि पश्चादुत्सृष्टविषं भुजंगममिव

दिष्टांतमाप्स्यति भवानपि पुत्रशोकादंते वयस्यहमिवेति तमुक्तवंतं
आक्रांतपूर्वमिव मुक्तविषं भुजंगं प्रोवाच कोसलपतिः प्रथमापराधः ७९

तं तं वृद्धं प्रति प्रथमापराधः प्रथमापराधीकर्तेत्युक्तिः इदं च सहने कारणमुक्तं शापदानात् पश्चात् को
सलपतिः दशरथः प्रोवाच ७९

५०

-नवम
२६

शापोपीति अदृष्टतनयाननपद्मशोभाये न तस्मिन्पुत्रके मयि भगवता पातितः वत्सत्वाद्
पातित इत्युक्तं अयं पुत्रशोकान्म्रियस्वेत्येवंरूपः शापोपि सानुग्रहः वृद्धकुमारयेनेष्टावाप्तिर्नोत्तरीय
कत्वात् सोपकार एवाग्निग्राहकस्यापि अनुग्राहकत्वं अर्थान्तरंन्यासेनाह इंधनैः काष्ठैः इद्धः प्रज्वलि

शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोयं
कृष्यां दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोहजननीं ज्वलनः करोति ८०

तः अग्निः कृष्यां कर्षणार्हां इन्धनाद्याकृष्टिचनेरिति क्षयप्रक्षितिं दहन्नपि बीजप्ररोहाणां बीजांकु
राणां जननीमुत्पादनक्षमां करोति ८०



इत्थमिति इत्थं गते त्वत्र चैसति वसुधाधिपेन राज्ञा गतघृणो निष्करुणोहं तु त्वात् अतएव तव वध्यः व
धार्हः अयं जनः अयमिति राज्ञो निर्वेदाद नादरेण स्वात्मा निर्दिष्टः किं विधत्तामित्यभिहिते मया किं विधे
यमिति विज्ञप्त इत्यर्थः समुनिः सदारः सभार्यः परासुं गतासुं पुत्रं अनुगंतुं मनो यस्य सोनुगंतुमनाः

इत्थं गते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन एधान्
हुताशनवतः समुनिर्ययाचे पुत्रं परासुमनुगंतुमनाः सदारः ८१

गंतुकामः सोर्थेरिति मकारलोपः हुताशनवतः साग्नीन् एधान् काष्ठानि ययाचे न चात्र आत्मघात
दोषः अनुष्ठानासमर्थस्य वानप्रस्थस्य जीवतः भृग्वग्निजलसंपातैर्मरणं तु विधीयत इति वचना
त् ८१

नवम आत्तेति आत्तानुगोराजासपदिअस्यमुनेः शासनं काष्ठसंभरणरूपं आगेकोपिआत्तानुगत्वात्संपाद्यपा
२७ तकेनमुनिवधनिमित्तेनविलुप्तधृतिः नष्टोत्साहः अंतर्निविष्टपदं लब्धस्थानं आत्मविनाशहेतु
शापं अंबुराशिः और्वं ज्वलनं वाडवानलमिव और्वस्तु वाडवानेलइत्यमरः दधत्सन्निवृत्तः ८२

आत्तानुगः सपदि शासनमस्य राजा संपाद्यपातकविलुप्तधृतिर्निवृत्तः
अंतर्निविष्टपदमात्मविनाशहेतुं शापं दधज्ज्वलनमौर्वमिवाबुराशिः ८२
इतीश्रीरघुवंशेमहाकाव्येकालिदासकृतौनवमः सर्गसमाप्तः ९

इतीश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायांरघुवंशव्याख्यायांसंजीविनीसमा
ख्यायांनवमः सर्गसमाप्तिमगमत् ९ शके १७५६ जयनामसंवत्सरे ९

श्रीगणेशायनमः

रघुवंश

द्वशमसर्गः[illegible] प्रारंभः।।

र: सर्ग १०

॥१॥ श्रीगणेशाय नमः ॥ आनंदसेन्निस्यमानंदरामनामकध्यानकं ॥ सन्ति: सर्वे ...वर्णौ निःस्वंपेयंपेयं प्रमादिहं ॥ १ ॥
पृथ्वीमिति पृथिवीं शासतः पालयतः पाकशासनतेजसः इंद्रवर्चसः अनूनर्द्धेः महासमृद्धेः तस्य दशरथस्य
किंचिदूनं ईषदूनं शरदां वत्सराणां अयुतं दशसहस्रं ययौ एकेन दशसहस्रेण न्यूनमयुतं नि

श्रीगणेशाय नमः ॥ पृथिवीं शासतस्तस्य पाकशासनतेजसः ॥ किंचिदूनमनूनर्द्धेः श
गणपति रदामयुतं ययौ ॥१॥ ॥ ॥ ॥ ॥ ॥

युते तथा प्रयुक्तं कोट्यर्बुदं च पद्मस्थानात् स्थानं दशगुणं स्यादिति वचनात् इदं च मुनिशापात्
पर्यवेदितव्यं न तु जननात् षष्टिर्वर्षसहस्राणि जातानि मम कौशिक ॥ दुःखेनोत्पादितश्चायं
न रामं नेतुमर्हसीति रामायणविरोधात् नाभिषेकात् परं तस्यापि सम्यग्विनीतमथ व
र्महरं कुमारमादिश्य रक्षणविधौ विधिवत् प्रजा मिति कौमारानुष्ठितत्वाभिधानात् स एव वि

2

न चैति ससुदशरथः पूर्वेषामपि नृणां ऋणनिर्मोक्षसाधनं एष वा अनृणो यः पुत्री ति श्रुतेः पितृऋणविमुक्तिमु
क्तिकारणं सद्यः शोक एव तमः तदपहंतीति शोकतमोपहं अत्रामयं करइति वद्रूपके सिद्धेपि नदं
न विधिमाश्रित्य अपकृष्टं तमसो रिति उः प्रत्ययः सुतानाभिधानं सुतइत्यभिधानं यस्य तत् सुत
न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनं ॥ सुताभिधानं स ज्योतिः सद्यः शोकतमोपहं ॥ २ ॥
गणपति अतिष्ठत् प्रत्ययापेक्षसंततिः स चिरं नृपः ॥ प्राङ्मंथादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥ ३ ॥

नाख्यं ज्योतिर्न चोपलेभे धनप्राप ॥ २ ॥ अतिष्ठदिति प्रत्ययं हेतुमपेक्षत इति प्रत्ययापेक्षा संततिर्यस्य स त
थोक्तः प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु इत्यमरः ॥ स नृपो मंथनं मथः मथ धातोः कः मंथनात् पूर्वं अ
नभिव्यक्तो अदृष्टा रत्नोत्पत्तिर्यस्य सो वर्ण इव अर्णव इव चिरमतिष्ठत् अनेन पुत्रबाहुल्यं सूचितं राज्ञो गांभीर्यं सं
तेश्वररत्नरूपत्वं सामग्र्यभावाद्विलंबो न तु वंध्यत्वादिति भावः ॥ ३ ॥ ॥ ॥ ॥ ॥

3

ऋष्यशृंगेति ऋष्यशृंगो नाम कश्चिदृषिः तदादयः ऋतुमृतौ वा जयंतीति ऋत्विजाः याजकाः ऋत्वि
कृद्धृगित्यादिना क्विन् प्रत्ययांतो निपातः यतात्मानो जितांतःकरणाः संतः बुधाः संतानकांक्षिणः
पुत्रार्थिनस्तस्य पुत्रीयां पुत्रनिमित्तां पुत्राच्छ चेति छ प्रत्ययः इष्टिं यागं आरेभिरे प्रचक्रिये॥४॥

ऋष्यशृंगादयस्तस्य संतः संतानकांक्षिणः॥ आरेभिरे यतात्मानः पुत्रियामिष्टिमृत्विजः॥४॥
तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिं॥ अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः॥५॥

तस्मिन्निति तस्मिन्नवसरे पुत्रकामेष्टिप्रवृत्तिसमये देवाः पुलस्त्यस्य गोत्रापत्यं पुमान् पौलस्त्यः
रावणः तेन उपप्लुताः पीडिताः संतो निदाघार्ताः घर्मातुराः अध्वानं गच्छंतीत्यध्वगाः पंथाः अंता
त्यंताध्वदूरपारसर्वानंतेषु इति डप्रत्ययः छायाप्रधानं वृक्षं छायावृक्षमिव शाकपार्थिवा
दित्वात्समासः हरिं विष्णुं अभिजग्मुः॥५॥





तइति ते देवाश्च उदन्वंतं समुद्रं उदन्वानुदधौ चेति निपातः प्रापुः आदिपुरुषो विष्णुश्च बुबुधे यो
गनिद्रां जहावित्यर्थः गमनप्रतिबोधयोः रविलंबार्थौ चकारौ तथाहि अव्याक्षेपो गम्यमानस्या व्या

ते च प्रापुरुदन्वंतं बुबुधे चादिपुरुषः॥ अव्याक्षेपो भविष्यंत्याः कार्यसिद्धेर्हि लक्षणं॥६॥

संगः अविलंब इति यावत् भविष्यंत्याः कार्यसिद्धेः क्षेत्रे णं चिह्नं हि लिंगं च अनैन्यवरता चास्य का
र्यसिद्धेस्तु लक्षणमिति॥६॥ ॥६॥ ॥६॥ ॥

॥३॥ ।भोगिभोगेति द्यौरोकोयेषांते दिवौकसो देवाः पृषोदरादित्वात्साधुः यद्वा दिवशब्दोदंतोप्यस्ति तत्र
दिवु क्रीडाविति धातोः कप्रत्यये निकः दिवमोको येषामिति विग्रहः हलंतेन विग्रहे ओकारमध्योपि
भोगिनः शेषस्य भोगः शरीरं भोगः सुखे स्यादिभृतावहेश्च फणकाययोरित्यमरः। स एव आस

गणपति भोगिभोगासनासीनं ददृशुस्तं दिवौकसः॥ तत्फणामंडलोदर्चिर्मणिद्योतितविग्रहं॥७॥

नं सिंहासनं तत्रासीनमुपविष्टं आसेः शानच् ईदास इति ईकारादेशः तस्य भोगिनः फणानां मंड
ले ये उदर्चिषः उद्गततरश्मयः मणयः तैर्द्योतितविग्रहः तं विधं ददृशुः॥७॥ ॥७॥



श्रीय इति कीदृशं विष्णुं पद्मे निषण्णायाः उपविष्टायाः श्रियः क्षौमांतरितामेखलाय स्य तस्मिन्
आसीर्णो करपल्लवो यस्मिन् तस्मिन् विशेषणद्वयेनापि चरणयोः क्षौकुमार्यान् कटिमेखला स्प
र्शसहत्वं सूच्यते। तस्मिन् अंके निक्षिप्तः चरणयो येन तं॥८॥ प्रबुद्धेति पुनः कीदृशं प्रबुद्धं विकसि
तं पुंडरीके तद्वद् दक्षिणी यस्य तं दिवसे तु पुंडरीकमेव अक्षिणी यस्येति विग्रहः बालातपेन निभं सदृशं

श्रियः पद्मनिषण्णायाः क्षौमांतरितमेखले॥ अंके निक्षिप्तचरणमास्तीर्णकरपल्लवे॥ ८॥
गणपति प्रबुद्धपुंडरीकाक्षं बालातपनिभांशुकं॥ दिवसं शारदमिव प्रारंभसुखदर्शनं॥ ९॥

अंशुकं यस्य तं पीतांबरधरमित्यर्थः अन्यत्र बालातपस्य निभो व्याजो यस्य तं दंशुअंशुकं यस्य तं निभो
व्याजसदृक्षयोरित्यभयत्राप्यमरः प्रकृष्टः आरंभः उद्यमः विष्णुसाक्षात्कार रूपः येषां योगिनां तेषां
सुखदर्शनं अन्यत्र प्रारंभे आदौ सुखदर्शनं शारदं शरत्संबंधिनं दिवसमिव स्थितं॥९॥

श्री० सर्ग २

॥५१॥

प्रभेति पुनः कीदृशं प्रभयानुलिप्तं अनुरंजितं श्रीवत्सं नाम लांछनं येन तं लक्ष्म्याः विभ्रमदर्पणं विलासादर्शं कौ
स्तुभं रत्नमिति अख्यायस्य तं अपां जलानां सारं स्थिरोत्तमणिमित्यर्थः बृहता उरसा बिभ्राणं ॥ १०॥ बाहुभि
रिति दिव्यैराभरणैः भूषितैः विटपाकारैः शाखाकारैः बाहुभिः उपलक्षितं अत एव अपांसे धवलानाम

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणं ॥ कौस्तुभाख्यमपांसारं बिभ्राणं बृहतोरसा ॥१०॥
बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ॥ आविर्भूतमपां मध्ये पारिजातमिवापरं ॥११॥
दैत्यस्त्रीगंडलेखानां मदरागविलोपिभिः ॥ आयुधैर्हेतिनामवद्भिरुदीरितजयस्वनैः ॥१२॥

गणपति

ध्ये आविर्भूतं अपरं द्वितीयं पारिजातमिव स्थितं ॥११॥ दैत्येति दैत्यस्त्रीगंडलेखानां असु
रांगनागंडस्थलीनां यो मदरागः तं विलुंपंति हरंतीति मदरागविलोपिनः तैः हेतिनामवद्भिः
सजीवैः हेतिभिः सुदर्शनादिभिः शस्त्रैः हेतिः शस्त्रार्चिरस्त्रयोरिति विश्वः उदीरितजय
स्वनं जयस्वनमुद्घोषयंतीभिः मूर्तिमतीभिः अस्त्रदेवताभिः उपास्यमानमित्यर्थः ॥१

८

मुक्तेति मुक्तो भगवत्संनिधानात्त्यक्तः शेषेण सह विरोधः सहजमपि वैरं येन तेन कुलि
शव्रणाः अमृताहरणकाले इंद्रयुद्धे यस्य वज्रप्रहाराः तेएव लक्ष्माणि यस्य तेन दुहितुः केस्याः
पत्युः कस्यचित् सर्पराजस्य गरुडात् अभयदाने कृते स्वभक्ष्यभक्षणक्षुभितं पक्षिराजं तदीयोढा
हं त्वत्तो बलाढ्य इति गर्वितं स्ववामजानुनी भारेणेव भंक्त्वा भगवान् विनिनायेति महाभारतक

मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ॥ उपस्थितं प्रांजलिना विनीतेन गरुत्मता ॥१३॥
योगनिद्रांतविशदैः पावनैरवलोकनैः ॥ भृग्वादीननुगृह्णंतं सौखशायनिकानृषीन् ॥१४॥

गणपति

थां सूचयति विनीतेति नित्यं नेन विनीतेन भगवता शिक्षितेन प्रांजलिना बद्धांजलिना गरु
त्मता गरुडेन उपस्थितं सेवितं ॥१३॥ योगेति योगो मनसो विषयांतरव्यावृत्तिः सैव निद्रा त
स्याः अंते अवसाने विशदैः प्रसन्नैः पावनैः शोधनैः अवलोकनैः सुखशायनं पृच्छंतीति सौ
ख्यशायनिकाः तान् पृच्छतां सुस्नातादिभ्य इति ठक् भृग्वादीन् ऋषीन् अनुगृह्णंतं १४

९

र॰ सर्ग १०

॥९॥ प्रणिपत्येति अथ दर्शनानंतरं सुराः सुरद्विषां असुराणां शमयित्रे विनाशकाय तस्मै प्रणिपत्य सुसं
स्तोत्रैः एतिस्तुशास्वृदृजुषः क्यबिति क्यप् प्रत्ययः। वाक् च मनश्च वाङ्मनसे अचतुरेत्यादिना च प्र
त्यांतो निपातः तयोः गोचरो विषयो न भवतीत्यवाङ्मनसगोचरस्तमेनं विष्णुं तुष्टुवुः अस्तुवन् ॥१५॥

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां ॥ अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरं ॥१५॥

गणपति नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ॥ अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥१६॥

नम इति पूर्वमादौ विश्वसृजे विश्वस्रष्ट्रे तदनु सर्गानंतरं विश्वं बिभर्त्रे पुष्णते अथ विश्वस्य ॥९
संहर्त्रे एवं त्रेधा सृष्टिस्थितिसंहारकर्तृत्वेन स्थितः आत्मा स्वरूपं यस्य तस्मै ब्रह्मविष्णुहरात्मने
तुभ्यं नमः ॥१६॥



ननु कूटस्थस्य कथं त्रैरूप्यमित्याशंक्यौपाधिकमित्याह रसांतराणीति एकरसं मधुरैकरसं दिविभवं दि
व्यं पयो वर्षोदकं देशे देशे स्थाने स्थाने अन्ये रसा इति रसांतराणि लवणादीनि यथा अश्नुते प्राप्नोति
एवम विक्रियो निर्विकारः एकरूप इत्यर्थः त्वं गुणेषु सत्त्वादिषु अवस्थाः स्रष्टृत्वादिरूपाः अश्नुषे ॥१७॥

रसांतराण्येकरसं यथा दिव्यं पयोऽश्नुते ॥ देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥१७॥

२ ना २ एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ॥ नानात्वं रागसंयोगात् स्फटिकस्येव ते स्मृतं ॥१८॥

गणपति अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः ॥ अजितो जिष्णुरत्यंतमव्यक्तो व्यक्तकारणं ॥१९॥

एक इति एक एकरूपस्त्वं करणतः उपाधितः नानामवस्थां प्रतिपद्यसे ततस्मात्ते नवं नानात्वं रज्यते अने
नेति रागो द्रव्यं जपाकुसुमादि तस्य संयोगात् स्फटिकस्येव स्मृतं प्रोक्तं ॥१८॥ अमेय इति हे देव त्वं अ
मेयो लोकैरियत्तया न परिच्छेद्यः मितलोकः परिच्छिन्नलोकः अनर्थी निस्पृहः प्रार्थना आवहति संपा
दयतीति प्रार्थनावहः अजितः अन्यैर्न जितः जिष्णुर्जयनशीलः अत्यंतमव्यक्तः सूक्ष्मरूपः व्यक्तस्य स्थूल

रघु सर्ग १०

॥६॥ हृदयेति हे देव त्वां हृदयस्थं सर्वान्तर्यामितया नित्यसंनिहितं तथाप्यनासन्नं अगम्यरूपत्वात् विप्रकृ-
ष्टं च विदुः संनिकृष्टस्यापि विप्रकृष्टत्वेनेव विरोधः तथा अकामं न कामो ऽभिलाषो यस्य तं नि-
त्यपरिपूर्णत्वान्निष्कामं तथापि तपस्विनं लोकत्रयार्थं तापसं विदुः तदुक्तं गीतासु न मे पार्थास्ति
कर्तव्यं त्रिषु लोकेषु किंच नानवाप्तमवाप्तव्यं वर्त एव च कर्मणीति किंच यद्यप्यनिष्ठो ऽस्तप

गणपति हृदयस्थमनासन्नमकामं त्वां तपस्विनं॥ दयालुमदयास्पृष्टं पुराणमजरं विदुः॥१९॥

एव विरोधः पालकत्वाद्दयालुं तेन हीनः तं स्पृहित्वा लुकैं च तथाप्यदयास्पृष्टं निःस्पृहं दुष्टजनार्दनत्वा-
त् संहारकत्वात् पुराणं पुरातनं तथापि न विद्यते जरा यस्य तं अजरं निर्विकारत्वात् दक्षरं विदुः
न जीर्यत इति विरोधाऽलंकार एवानद्युक्तं अभासत्वे विरोधं च नाम तेति विरुद्धेनाऽलौकिकमहि



सर्वज्ञ इति हे देव त्वं सर्वं जानातीति सर्वज्ञः इगुपधाल्लेति कप्रत्ययः अविज्ञातो न केनापीत्यर्थः त्वं सर्वस्य योनिः
कारणं त्वमात्मनैव भवतीत्यात्मभूः न ते किंचित्कारणमस्तीत्यर्थः त्वं सर्वस्य प्रभुः त्वमनीशः त्वमेकः सर्व-
रूपभाक् त्वमेक एव सर्वात्मना वर्तस इत्यर्थः॥२०॥ सप्तेति हे देव त्वं सप्तभिः सामभिः रथंतरादिभिः उपगी-

गणपति सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः॥ सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥२०॥
सप्तसामोपगीतं त्वां सप्तार्णवजलेशयं॥ सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयं॥२१॥

तं स्तुतं तद्धितार्थेत्युत्तरपदसमासः सप्तानामर्णवानां जलं सप्तार्णवजलं पूर्ववत्समासः तत्र शेत इति सप्तार्णव-
जलेशयः तां शयवासवासिष्वकालादिति लुक् सप्तार्चिः मुखं यस्य तं अग्निमुखा वै देवा इति श्रुतेः सप्ता-
नां लोकानां भूर्भुवस्वरादीनां संश्रयस्तेन भिन्नसंश्रयः एकश्चासौ संश्रयश्च तं एवंभूतं त्वामाचख्युः
॥२१॥

र०सर्ग१०
॥७॥

चतुरिति चतुर्णां धर्मार्थकाममोक्षाणां वर्गः चतुर्वर्गः त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षैरित्यमरः तत्फलं यस्य तत् ज्ञानं चत्वारि युगानि कृतत्रेतादीनि यस्यां सा चतुर्युगा कालावस्था कालपरिमाणं चत्वारो वर्णाः प्रकृतेऽच्यंते अस्मिन्निति चतुर्वर्णमयः चातुर्वर्ण्यप्रचुर इत्यर्थः तत्प्रकृतवचने मयट् तद्धितार्थे विषयेऽनुस्

गणपति चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगा॥ चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात्॥२३॥
अभ्यासनिगृहीतेन मनसा हृदयाश्रयं॥ ज्योतिर्मयं विचिन्वंति योगिनस्त्वां विमुक्तये॥२४॥

रुषसमासः स एवंविधो लोकस्त्वेवं रूपं सर्वं चतुर्मुखात् चतुर्मुखरूपिणस्त्वत्तः जातमिति शेषः इदं सर्वमस्त्वं जेतयदिदं किंचेति श्रुतेः॥२३॥ अभ्यासेति अभ्यासेन निगृहीतं विषयांतरेभ्यो निवर्तितं तेन मनसा योगिनो हृदयाश्रयं हृत्पद्मस्थं ज्योतिःमयं त्वां विमुक्तये मोक्षार्थं विचिन्वंति अन्विष्यंति ध्या

१४

अजस्येति न जायत इत्यजः अन्येष्वपि दृश्यत इति डप्रत्ययः तस्य अजस्य जन्मरहितस्यापि जन्मगृह्णतः मत्स्यादिरूपेण जायमानस्य निरीहस्य चेष्टारहितस्यापि हतद्विषः शत्रुघातिनः जागरूकस्य सर्वसाक्षितया नित्यप्रबुद्धस्यापि स्वपतो योगनिद्रामनुभवतः इत्थं विरुद्धचेष्टस्य तव याथार्थ्यं त्व

गणपति अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः॥ स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव॥२५॥
शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः॥ पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुं॥२६॥

रूपं को वेद को वेत्ति न कोपीत्यर्थः विदो लटो वेत्तिणलादेशः॥२५॥ शब्दादीनिति किंच कृष्णादिरूपेण शब्दादीन् विषयान् भोक्तुं नरनारायणादिरूपेण दुश्चरं तपः चरितुं तथा दैत्यमर्दने प्रजाः पातुं औदासीन्येन तटस्थेन वर्तितुं च पर्याप्तः समर्थोऽसि भोगतपसोः पालनौदासीन्ययोश्च परस्परविरुद्धयोराचरणे त्वदन्यः कः समर्थ इति भावः॥२६॥

१५

॥८॥ बहुधेति आगमैः शास्त्रैः सांख्यायनवेदोषिर्के ... पंचक बौद्ध आर्हतायतनादिभिः बहुधाभिन्ना अपिहि
हितेनवःपुरुषार्थसाधकाःपंथानःउपायाःजान्हव्याइमेजाह्नवीयाःगंगाःवृद्धइति छप्रत्ययःओघाःप्रवा
हाइवतेपिआगमैःआगतिभिःबहुधाभिन्नाःसिद्धहेतवस्तार्णवइवत्वय्येवनिपततितिप्रविशन्तियेनकेना

बहुधाप्यागमैर्भिन्नाःपंथानःसिद्धहेतवः॥ त्वय्येवनिपतन्त्योघाजाह्नवीयाइवार्णवे ॥२७॥

गणपति त्वदावेशितचित्तानांत्वत्समर्पितकर्मणां॥गतिस्त्वंवीतरागाणामभूयःसन्निवृत्तये २८

ष्युपायेनत्वामेवउपायांतीत्यर्थः॥२७॥त्वयीतित्वय्यावेशितंनिवेशितंचित्तंयेषांतुभ्यंसमर्पितानिकर्मा
णियैस्तेषांमन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरुमामेवैष्यसिकौंतेयप्रतिजानेप्रियोसिमेइति
भगवद्गीतावचनात्वीतरागाणांविरक्तानांअभूयःसन्निवृत्तयेमोक्षायेत्यर्थःत्वमेवगतिःसाधनंत्वमे
वेविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायेतिश्रुतेः॥२८॥ ॥५॥ ॥



प्रत्यक्षइति प्रत्यक्षःप्रमाणगम्यःतवमहदादिःपृथिव्यादिःमहिमाऋद्धिःऐश्वर्यंप्रत्यक्षोपिअपरिच्छेदइयत्तया
नावधार्यःअतद्व्यावृत्त्याकूचेदःयतोवाइमानीतिश्रुतेःअनुमानंक्षित्यादिकंसकर्तृकंकार्यत्वात्घटवदित्यादि
ताभ्यांसाध्यंगम्यंत्वांप्रतिकाकथाप्रत्यक्षमपित्वत्कृतंजगत्अपरिच्छिन्नंतत्कारणस्त्वंप्रत्यक्षःअपरिच्छे

प्रत्यक्षोप्यपरिच्छेद्योमह्यादिर्महिमातव॥ अतद्वागनुमानाभ्यांसाध्यंत्वांप्रतिकाकथा॥२९॥

गणपति केवलंस्मरणेनापिपुनासिपुरुषंयतः॥ अनेनवृत्तयःशेषानिवेदितफलास्त्वयि॥३०॥

द्यइतिकिमुवक्तव्यं॥२९॥केवलमितिस्मरणेनकेवलंकृत्स्नंकेवलःकृत्स्नएकइत्यमरः अपनः पुरुषंस्मा
र्तारंजनंपुनासियतःयादित्यर्थः॥ अनेनपवित्रीकरणेनेवत्वयित्वद्विषयेयाःशेषाःअवशिष्टाःवृत्तयः
दर्शनस्पर्शनादयोव्यापारास्तानिवेदितफलाःज्ञापितफलाःतवस्मरणस्यैवंफलंदर्शनस्पर्शनादीनां
तुकियदित्यवधारयामः॥३०॥

र०सर्ग१०

॥१८॥

उदधेरिति उदधेः रत्नानीव विवस्वतः तेजांसीव दूराणि अवाङ्मनसगोचराणि ते तव चरितानि स्तुतिभ्यो व्य
तिरिच्यंते अधिकानि भवंति निःशेषस्तोतुमशक्यमित्यर्थः॥३०॥ अनवाप्तमिति अनवाप्तं अप्राप्तं अवाप्तव्यं कर्म
ते तव किंचन नास्ति किंचिदपि न विद्यते नित्यपरिपूर्णत्वादिति भावः तर्हि किंनिबंधने जन्मकर्मणी तत्राह

उदधेरिव रत्नानि तेजांसीव विवस्वतः॥ स्तुतिभ्यो व्यतिरिच्यंते दूराणि चरितानि ते॥३१॥

गणपति अनवाप्तमवाप्तव्यं न ते किंचन विद्यते॥ लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः॥३२॥

महिमानं यदुत्कीर्त्य तव संह्रियते वचः॥ श्रमेण तदशक्त्या वा न गुणानामियत्तया॥३३॥

लोकेति एको लोकानुग्रह एव ते जन्मकर्मणोः हेतुः कारणं परमकारुणिकस्य ते परमर्थैव प्रवृत्तिः न स्वार्थैवे
त्यर्थः॥३२॥ महिमानमिति तव महिमानं उत्कीर्त्य वचः संह्रियते इति यत् तद्वचः संहरणं श्रमेण वाग्व्यापा
र श्रान्त्या अशक्त्या वा कार्त्स्न्येन वक्तुमशक्यत्वात् न तु गुणानामियत्तया एतावन्मात्रत्तया न तेषामानंत्या

१८

इत्यर्थः इति ते सुराः तमधोक्षजं अक्षजं इंद्रियजं ज्ञानं यस्मिन् अधोक्षजं विष्णुं प्रसादयामासुः प्रसन्नं चक्रुः
हि यस्मात् परमेष्ठिनः सर्वोत्तमस्य तस्य देवस्य सा देवैः कृता भूतार्थव्याहृतिः भूतस्य सत्यस्य अर्थस्य व्याहृ
तिः उक्तिः युक्तेः स्मादवृते भूतमित्यमरः न स्तुतिः प्रशंसामात्रं महांतो हि यथा कथंचिद्विश्लेन न स्तुत्या इति
भावः परमे स्थाने तिष्ठतीति परमेष्ठी। किदित्युणादि सूत्रेण तिष्ठते रिनि प्रत्ययः॥ तस्मिन्नुरूपे स्तुति व कुशलमि

गणपति इति प्रसादयामासुस्ते सुरास्तमधोक्षजं॥ भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः॥३४

तस्मै कुशलसंप्रश्नव्यंजितप्रीतये सुराः॥ भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः॥३५

त्य कुशलस्यास्ति स्तुणामिति वक्तव्यात् पत्ते॥३४॥ तस्मै इति सुराः देवाः कुशलस्य संप्रश्नेन व्यंजि
ता प्रकटीकृता प्रीतिर्यस्य ९। लक्षितत्तैप्रसादायेत्यर्थः॥ अन्यथा अनवसर विज्ञप्तिः स्वराणामिव निः
फला स्यादिति भावः तस्मै विष्णवे अप्रलये प्रलयाभावेपि उद्वेलात् दुर्मर्यादात् नैरृतो राक्षसः रावणः
स एवोदधिस्तस्मात् भयमाचख्युः कथितवंतः॥३५॥

१८

र-सर्ग-१०
॥ १०

अथेति अथ वेलायां अब्धिकूले समासन्नानां सन्निकृष्टानां शैलानां रंध्रेषु गह्वरेषु अनुवादिना प्र
तिध्वनिमता स्वरेण परिभूतार्णवध्वनिः तिरस्कृतसमुद्रघोषः भगवानुवाच ॥ ३६ ॥ पुराणस्येति
पुराणस्य चिरंतनस्य कवेः तस्य भगवतः वर्णस्थानेषु उरःकंठादिषु समीरिता सम्यगुच्चारिता
अतएव कृतः संपादितः संस्कारः प्रकृतिप्रत्ययनिर्वचनं संवृतादिर्वा यस्याः सा भारती चरितार्था

गणपति अथ वेलासमासन्नशैलरंध्रानुवादिना ॥ स्वरेणोवाच भगवान् परिभूतार्णवध्वनिः ३६ नु
पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता ॥ बभूव कृतसंस्कारा चरितार्थैव भारती ३७
बभौ स दशनज्योत्स्ना सा विभोर्वदनोद्गता ॥ निर्यातशेषा चरणात् गंगेवोर्ध्वप्रवर्तिनी ३८
कृतार्थैव बभूव एकारस्य संभावना विपरीत भावना ... ॥ ३७ ॥ बभाविति विभोर्विष्णोर्वदनादुद्
गता निःसृता सदशनज्योत्स्ना दंतकांतिसहिता इदं विशेषणं धावल्यातिशयार्थं अतएव सा ...
चरणादंघ्रेः निर्याता वा शेषाच निर्यातशेषा निःसृतावशिष्टेत्यर्थः ऊर्ध्वप्रवर्तिनी ऊर्ध्वप्रवाहिनी गं

20

यदाह भगवांस्तदाह जाने इति हे देवाः वः युष्माकं अनुभावपराक्रमौ भो अनुभावो महिमा पराक्रमः
पौरुषं अनुभावपराक्रमौ रक्षसा रावणेन अंगिना शरीरिणा प्रथममध्यमौ सत्वराजौ रूपौ गु
णौ तमसेव तमोगुणेनेव आक्रांतौ जाने वाक्यार्थः कर्म ॥ ३९ ॥ विदितमिति किंच अकामेन अनिच्छ

गणपति जाने वो रक्षसाक्रांतावनुभावपराक्रमौ ॥ अंगिना तमसेवोभौ गुणौ प्रथममध्यमौ ३९ ॥
विदितं तप्यमानं च तेन मे भुवनत्रयं ॥ अकामोपनतेनेव साधोर्हृदयमेनसा ॥ ४० ॥

योपनतेन प्रमादादागतेन एनसा पापेन साधोः सज्जनस्य हृदयमिव तेन रक्षसा तप्यमानं संत
प्यमानं तपिर्भौवादिकात्कर्मणि शानच् भुवनत्रयं च मे विदितं मया ज्ञायत इत्यर्थः मतिबुद्ध्या
दिना वर्तमाने क्तः क्तस्य च वर्तमाने इति षष्ठी ॥ ४० ॥

29

र०सर्ग १०
॥११॥

कार्येष्विति किंच एककार्यत्वात् एकं कार्यं ययोस्तौ तयोर्भावस्तस्मात् हेतोः कार्येषु कर्तव्यार्थेषु विषयेषु व
ज्रिणा इंद्रेण अभ्यर्थ्योऽहं नास्मि अभ्यर्थ्यः इदं कुर्विति प्रार्थनीयो नास्मि प्रेरणां विना कार्यं प्रवृत्तिरित्याशयः कथा
हि हि यस्माद्धेतोः वातः स्वयमेवाग्नेः सारथ्यं साहाय्यं प्रतिपद्यते प्राप्नोति न तु वह्निप्रार्थनया इत्येव कारणं

कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा॥ स्वयमेव हि वातोऽग्नेः सारथ्यं प्रतिपद्यते॥ ४१॥

गणपति स्वासिधारापरिहृतः कामं चक्रस्य तेन मे॥ स्थापितो दशमो मूर्धा लभ्यांश इव रक्षसा॥ ४२॥ अथा

प्रेक्षावतां स्वार्थेषु स्वत एव प्रवृत्तिर्न परप्रार्थनया स्वार्थश्चायमिंद्रस्येत्याशयः॥ ४१॥ पुरा किल त्रिपुरारिं प्रीण
नाय स्वशिरांसि छित्त्वा दत्तवता दशकंधरेणायं दशमं शिरो वशेषितं तन्मच्चक्रार्थमित्याह स्वासिधारया स्व
खड्गधारया परिहृतः अच्छिन्न इत्यर्थः दशमो मूर्धा मे चक्रस्य कामं पर्याप्तः लभ्यांशः छेदनीयभाग इव ते
न रक्षसा रावणेन स्थापितः सर्वथा तं हनिष्यामीत्यर्थः॥ ४२॥



तर्हि प्रागुपेक्षित अत आह स्रष्टुरिति किंतु स्रष्टुर्ब्रह्मणो वरातिसर्गात् वरदानाद्धेतोः तस्य दुरात्मनो रिपोः
रावणस्य अत्यारोहं रूढं अत्यारोहणं अतिवृद्धिरित्यर्थः नपुंसके भावे क्तः भोगिनः सर्पस्य अत्यारूढं चं

स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः॥ अत्यारूढं रिपोः सोढं चंदनेनेव भोगिनः॥ ४३॥
गणपति धातारं तपसा प्रीतं ययाचे स हि राक्षसः॥ दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः॥ ४४॥

दनेनेव मया सह्यं सोढं चंदनस्यापि स्रष्टुर्नियतेरिति द्रष्टव्यं॥ ४३॥ संप्रति वररूपमाह धातारमिति
स राक्षसः तपसा प्रीतं संतुष्टं धातारं ब्रह्माणं मर्त्येषु विषये आस्थापराङ्मुखः सन् मर्त्यान् नादरेत्यर्थः
दैवात्सर्गात् अष्टविधात् देवसृष्टेः अवध्यत्वं ययाचे हि॥ ४४॥

र॰सर्ग॰१०

॥४२ नर्हि कागतिरित्याशंक्य मनुष्यावतारेण हनिष्यामीत्याह सोऽहमिति सोऽहं दशरथस्य अपत्यं पुमान् दाशरथि
अत इञिति इञ्प्रत्ययः रामो भूत्वा तीक्ष्णैः शरैः तस्य रावणस्य शिरांस्येव कमलानि तेषामुच्चयं राशिं
रणभूमेर्बलिक्षमं पूजार्हं करिष्यामि पुष्पनिरासादाहि पूजेति भावः॥४४॥ अचिरादिति हे देवाः यूयं यज्वा

सोऽहं दाशरथिर्भूत्वा रणभूमेर्बलिक्षमं॥ करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयं॥४४॥

गणपति अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पुनः॥ मायाविभिरनालीढमादास्यध्वे निशाचरैः॥४५॥

भिर्याज्ञिकैः विधिवत् कल्पितं उपहृतं भागं हविर्भागं मायाविभिः मायावद्भिः अस्मायामेधास्रजो विनिरिति
विनिप्रत्ययः निशाचरैः राक्षसैः अनालीढं अनास्वादितं यथा तथा अचिरात् पुनः आदास्यध्वे ग्रहीष्य
थ मया रावणे हते सति कैंकोयज्ञाभविष्यतीत्यर्थः॥४५॥ ॥



नर्हि कागतिरित्याशंक्य मनुष्यावतारेण हनिष्यामीत्याह सोऽहमिति सोऽहं दशरथस्य अपत्यं पुमान् वैमानि
कादति मरुतां देवानां पथि व्योम्नि विमानेश्चरंतीति वैमानिकाः चरतीति ठप्रत्ययः घावरणतत्पराः रावणभया
त् मेघेषु अंतर्धानतत्पराः पुण्यकृतः सुकृतिनः पुष्पकालोकेन्यदृच्छया रावणविमानदर्शनेन यः संक्षोभः
तं त्यजंतु॥४६॥ मोक्ष्यध्व इति हे देवाः यूयं शापेन नलकूबरशापेन यंत्रितस्य नियमितस्य पौलस्त्यस्य रावण

वैमानिकाः पुण्यकृतस्त्यजंतु मरुतां पथि॥ पुष्पकालोकसंक्षोभं मेघावरणतत्पराः॥४६

गणपति मोक्ष्यध्वे सुरबंदीनां वेणीबंधानदूषितान्॥ शापयंत्रितपौलस्त्यबलात्कारकचग्रहैः॥४७॥

स्य बलात्कारेण ये कचग्रहाः केशाकर्षाः तैरदूषितान् अनुपहतान् स्वर्गबंदीनां हृतस्वर्गांगनानां वेणी
बंधान् मोक्ष्यध्वे पुरा किल नलकूबरेण आत्मानमभिसरंत्याः रंभायाः बलात्कारेण संभोगात् क्रु
द्धेन दुरात्मा रावणः शप्तः स्त्रीणां बलात् ग्रहणे तन्मूर्द्धा तेशतधा भविष्यतीति भारतीया कथा अनुसंधे
या॥४७॥

र·टी० ९३

रावणेति स कृष्णः श्यामवर्णो विष्णुरेव मेघः नीलमेघश्च विश्रवसोऽपत्यं पुमान् रावण इति विग्रहः विश्रवः शब्दात् शिवादित्वादणि कृते विश्रवसो विश्रवण ॥ विश्रवणरवणौ ॥ इति सूत्रेण विश्रवःशब्दस्य वृत्तिविषये रावणादेशो रावण इति सिद्धं स एव अवग्रहो वर्षप्रतिबन्धः तेन क्लान्तं म्लानं मरुतो देवा एव

रावणावग्रहक्लान्तमिति वागमृतेन सः ॥ अभिषिच्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥ ४९

गणपति

पुरुहूतप्रभृतयः सुरकार्योद्यतं सुराः ॥ अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥ ५० ॥

सस्यं इत्येवं पूरूपेण वागमृतेन कर्णामलिकेन अमृतं यस्य शेषस्यात् पीयूषसलिकेन तामिति विष्णुः अभिषिच्य अभिवृष्या अभिसिंच्य अन्तर्दधे ॥ ४९ ॥ प्रकृतमनुसरति पुरुहूतेति पुरुहूतप्रभृतयः इन्द्राद्याः सुराः सुरकार्ये रावणवधरूपे उद्यतं विष्णुं अंशैर्मात्राभिः



अथेति अथ तस्य विशांपत्युः दशरथस्य संबन्धिनः काम्यस्य कर्मणः पुत्रकामेष्टेरन्तेऽवसानेऽग्नेः पावकात् कश्चिद्दिव्यः पुमान् ऋत्विजां विस्मयेन सह प्रबभूव प्रादुर्बभूव तदाविर्भावात् तेषामपि विस्मयोऽभूदित्यर्थः ॥ ५१ ॥ तमेव पुरुषं विशिनष्टि हेमपात्रेति आद्यस्य पुंसो वि

अथ तस्य विशांपत्युरन्ते काम्यस्य कर्मणः ॥ पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजाम् ॥ ५१ ॥

गणपति

हेमपात्रगतं दोर्भ्यामादधानः पयश्चरुं ॥ अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहं ॥ ५२ ॥

ष्णोः अनुप्रवेशात् अधिष्ठानाद्धेतोः तेनापि दिव्यपुरुषेणापि दुर्वहं चतुर्दशभुवनादेरपि हरेः अनिगरीयस्त्वात् वोढुमशक्यं हेमपात्रगतं पयसि पक्वं चरुं पयश्चरुं पायसान्नं दोर्भ्यामादधानः वहन् अनवस्राविनिरूपोपपक्व ओदनश्चरुरिति याज्ञिकाः हव्यपाके चरुः पुंसि इत्यमरश्च ५२

र.सर्ग.१०

॥५४॥ प्राजापत्येति नृपोदशरथः प्राजापत्येन प्रजापतिसंबंधिना पुरुषेणोपनीतं न तु वसिष्ठेन प्राजापत्येन शत्रिद्धिमाभिहाभ्यां गतं नृपेति रामायणात् अन्नं पायसान्नं उदन्वताउदधिना आविष्कृतं प्रकाशितं पयसां सारं अमृतं वृषा वासवइव वासवोवृत्रहावृषेत्यमरः प्रत्यग्रहीत् स्वीचकार ॥५३॥ अनेनेति तस्य राज्ञो द

गणपति प्राजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः॥ वृषेव पयसां सारमाविष्कृतमुदन्वता॥५३॥
अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः॥ प्रसूतिं चकमे तस्मिन् त्रैलोक्यप्रभवोपि यत्॥५४॥

शरथस्य गुणाः अन्यैर्दुर्लभाः असाधारणाः अनेन कथिताः आख्याताः यद्यस्मात् त्रयो लोका इति त्रैलोक्यं चातुर्वर्ण्यादित्वात् स्वार्थेष्यञ् तस्य प्रभवः कारणं विष्णुरपि तस्मिन् राज्ञि प्रसूतिमुत्पत्तिं चकमे कामितवान् ।त्रिभुवनकारणस्यापि कारणमिति परमावधिर्गुणसमुदाय इत्यर्थः॥५४॥ ॥

28

सइति स नृपः चरुसंज्ञास्य संजाता चरुसंज्ञितं वैष्णवं तेजः पत्न्योः कौसल्याकैकेय्योः द्यौश्च पृथिवी च द्यावापृथिव्यो ३ दिवश्च पृथिव्यामिति चकारात् दिवशब्दस्य द्यावादेशः तयोः द्यावापृथिव्योः अह्नःपतिः अहर्पतिः सूर्यः अहरादीनांपत्यादिषु वा रेफ इति उपसंख्यानात् वैकल्पिको रेफस्य रेफादेशो विसर्गापवादः प्रत्यग्रं नूतनं आतपमिव विभजे विभज्य ददावित्यर्थः॥५५॥ अर्चितेति तस्य राज्ञः कौसल्यापत्यं स्त्री कौ

गणपति स तेजो वैष्णवं पत्न्योर्विभजे चरुसंज्ञितं॥ द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपं॥ ॥५५॥
अर्चिता तस्य कौसल्या प्रिया केकयवंशजा॥ अतः संभाविताभ्यां सुमित्रामैच्छदीश्वरः॥५६॥

सल्या वृद्धात्कोसल्लाजादाञ्यङ् इति ञ्यङ् प्रत्ययः ञ्यङः ष्यापाविति चाप् अत एव सूत्रनिर्देशान् कोसल शब्दोदंत्यसकारमध्यमः कौ पृथिव्यां सलति गच्छतीति कोसलः सलगतौ पचाद्यच् कुशब्दस्य पृषोदरादित्वात् गुणः अर्चिता ज्येष्ठा मान्येत्यर्थः केकयवंशजा कैकेयी प्रिया इष्टा अतः हेतोः ईश्वरो भर्ता नृपः सुमित्राताभ्यां कौसल्याकैकेयीभ्यां संभाविताभ्यां दानेन मानिता मैच्छदिच्छति स्म एवं च सामान्यं तिसृणां भाग

29

र॰ सर्ग॰ १०

॥ ५९

त इति बहुज्ञस्य सर्वज्ञस्य अत एव चित्तज्ञे स्वाभिप्रायज्ञे इत्यर्थः पत्युर्महीक्षितः क्षितीश्वरस्य विशेषणत्रयेण राज्ञोनुसरणतामाह चित्तज्ञे अभिप्रायज्ञे ते उभे पत्न्यौ कौसल्याकैकेय्यौ चरोः अर्द्धभागो समभागो तयोः अर्द्धभागौ एकदेशौ ताभ्यामर्द्धार्द्धभागाभ्यां पुंस्यर्द्धोर्द्धं समे शके इत्यमरः तां सुमित्रामयोजयतां युक्तां चक्रतुः अयं च

गणपति

ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः॥ चरो
रर्द्धार्द्धभागाभ्यां तामयोजयतामुभे॥५७॥

विभागोयं रामायणसंवादी तत्र चरोरर्द्धं कौसल्यायै अवशिष्टार्द्धं कैकेय्यै शिष्टं पुनः सुमित्रायै इत्यभिधानात् किं तु पुराणांतरसंवादोत्र द्रष्टव्यः उक्तं च नारसिंहे तत्प्राशिष्यति उप्राशने काले सुमित्रायै महीपतेः पिंडाभ्यामल्पमल्पं तु स्वभगिन्यै प्रयच्छतः इति एवमन्यत्रापि सति विरोधे पुराणांतरात्



नु चैवं सत्सपत्नीर्ष्या स्यादित्याशङ्क्याह सा हीति सुमित्रा तयोरुभयोरपि समानः एकः पतिर्ययोः तयोः सपत्न्योः निजसपत्न्यादित्वात् ङीप् नकारादेशश्च भ्रमरी भ्रमरस्त्री गगनावारणस्य गजस्य मदनिष्यंदलेखयोरिव गंडद्वये गतयोरिति भावः प्रणयवती प्रेमवती आसीत् सपत्न्यौ गंडलेखयोः पत्युः वारणस्योपमानं ज्ञेयं॥५८॥ ताभिरिति ताभिः तिसृभिः नृपपत्नीभिः प्रजानां भूत्यै अभ्युदयाय विष्णोरंशः सं

सा[illegible]प्रणयवत्यासीत्सपत्न्योरुभयोरपि॥भ्रामरिवारणस्येव मदनिष्यंदलेखयोः॥५८॥
ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः॥ सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः॥५९॥

भवः कारणं यस्य स गर्भः सूर्यस्य इमाः सौर्यः ताभिः सौरीभिः सूर्यत्विषेत्युपधायालोपः अमृता इत्याख्या यासां ताभिः जलप्रवाहनसाम्यात् नाडीभिरिव नाडीभिः वृष्टिविसर्जनीभिः दीधितिभिः अपां विकारो अम्मयः जलमयगर्भ इव दध्रे धृतः जातावेकवचनं दध्रिरे इत्यर्थः अत्र यादवः तासां शतानि चत्वारि रश्मीनां वृष्टिसर्जने शतत्रयं हिमोत्सर्गे तद्वत् गर्भस्य सर्जने अंन

५८ विनायक

सममिति समं युगपत् आपन्ना गृहीताः सत्त्वाः याभिस्ताः आपन्नसत्त्वाः गर्भिण्यः आपन्नस
त्त्वा स्याद् दुर्विर्ण्यन्तर्वत्नी तु गर्भिणीत्यमरः। अतएव आपाण्डुरत्विषः पाण्डुरवर्णाः ताः राजपत्न्यः अं
तर्गताः फलारम्भाः फलप्रादुर्भावाः यासां ताः सस्यसंपद इव रेजुः बभुः॥ ५९॥ संप्रति तासां
स्वप्नदर्शनान्याह॥ गुप्तमिति। सर्वास्ताः स्वप्नेषु जलजः शंखः जलज आसिर्गदा शार्ङ्गं च चक्रैर्लाञ्छिताः मू

सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः॥ अन्तर्गतफलारम्भाः सस्यानामिव संपदः॥ ६०॥ गुप्तं दद
शुरात्मानं सर्वाः स्वप्नेषु वामनैः। जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्तिभिः॥ ६१॥ ॥

र्तयो येषां तैर्वामनैः कृस्वपुरुषैः गुप्तं रक्षितं आत्मानं रूपं ददृशुः॥ ६१॥ ॥



हेमेति। किं चेति चार्थः। हेम्नः सुवर्णस्य पक्षाणां प्रभाजालं कान्तिपुंजं विततन्वता विस्तारयता वेगेनाकृष्टाः पयोमुचो मेघाः
येन सुवर्णेन गरुत्मता गगने ता उह्यन्ते स्म ऊढाः॥ ६२॥ विभ्रत्येति। किं च स्तनयोरन्तरे मध्ये विलंबितं लंबमानं न्यस्यत
इति न्यासः तं पत्न्यान्यस्तं कौस्तुभमित्यर्थः। बिभ्रत्या पद्ममेव व्यजनं हस्ते यस्याः सा तया लक्ष्म्या पर्युपास्यन्त उपासि
ताः॥ ६३॥ कृतेति। दिविभवा या दिव्या यां त्रिस्रोतसि आकाशगंगायां कृताभिषेकैः कृतावगाहैः परं ब्रह्म वेदरह
जा हेमपक्षप्रभाजालं गगने च वितन्वता॥ उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा॥ ६२॥ बिभ्रत्या कौस्तुभन्यासं स्त
नान्तरविलंबितं। पर्युपास्यन्त लक्ष्म्या च पद्मव्यजनहस्तया॥ ६३॥ कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्त ग
भिः। ब्रह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे॥ ६४॥ ताभ्यस्तथाविधान्स्वप्नान्श्रुत्वा प्रीतो हि पार्थिवः। मेने
परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः॥ ६५॥
स्यं गृणद्भिः पठद्भिः सप्तभिः ब्रह्मर्षिभिः कश्यपप्रभृतिभिः
उपतस्थिरे उपासांचक्रिरे॥ ६४॥ ताभ्य इति। पार्थिवो दशरथस्ताभ्यः पत्नीभ्यः आख्यातोपयोगे इत्यपादानात् पं
चमी। तथाविधांस्तत्प्रकारान् स्वप्नान् श्रुत्वा प्रीतः आत्मानं जगद्गुरोः विष्णोः गुरुत्वेन हेतुना परार्ध्यं सर्वोत्कृष्टं मेने हि॥
५९

विभक्तेति। एकः एकरूपः विभुर्विष्णुः तासां राजपत्नीनां कुक्षिषु गर्भेषु प्रसन्नानां निर्मलानामपां कुक्षिषु प्रतिमा चंद्रः
इव अनेकधा विभक्तात्मा सन्नुवास ॥६६॥ अथेति। अथ राज्ञो दशरथस्य सती पतिव्रता अग्र्या चासौ महिषी
च अग्र्यमहिषी कौसल्या प्रसूतिसमये प्रसूतिकाले ओषधिः रक्तं रात्रौ ज्योतिरिव तमोपहं तीति तमोपहं। अपहं
तेर्तमसोऽति निडप्रत्ययः। तमोनाशकं पुत्रं लेभे प्राप ॥६७॥ रामइति। अभिरमतेऽस्मिन्नित्यभिरामं मनोहरं अधिकरणे

विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ॥ उवास प्रतिमा चंद्रः प्रसन्नानामपामिव ॥६५॥ अथाग्र्यमहि
षी राज्ञः प्रसूतिसमये सती। पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥६७॥ राम इत्यभिरामेण वपुषा तस्य
चोदितः ॥ नामधेयं गुरुश्चक्रे जगत्प्रथममंगलं ॥६८॥ रघुवंशप्रदीपेन तेनाप्रतिमतेजसा। रक्षागृहगता दीपाः
प्रत्यादिष्टा इवाभवन् ॥६९॥

घञ्प्रत्ययः ॥ तेन वपुषा चोदितः प्रेरितः गुरुः पिता दशरथः
तस्य पुत्रस्य जगतां प्रथमं मंगलं शुभलक्षणं राम इत्यभिधेयं चक्रे ॥ अभिराम एव रामः ... इत्यर्थः ॥६८
रघ्विति। रघुवंशस्य दीपेन प्रकाशकेनाप्रतिमतेजसा अप्रतिमं तेन रामेण रक्षागृहगताः सूतिकागृहगता दीपाः प्रत्यादिष्टाः



शय्येति शातोदरी गर्भमोचनात् कृशोदरी माता कौसल्या शय्यागतेन रामेण सैकतेषु पुलि
नेषु अंभोजबलिः पद्मोपहारस्तेन शरदि कृशा जाह्नवी गंगेव बभौ ॥७०॥ कैकेय्या इति केकयस्य
राज्ञोऽपत्यं स्त्री कैकेयी तस्या अपत्यमित्यणि कृते केकयमित्रयुप्रलयानामादेरिय इति यादेशः

शय्यागतेन रामेण माता शातोदरी बभौ ॥ सैकतांभोजबलिना जाह्नवीव शरत्कृशा ॥७०

कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ॥ जनयित्रीमलंचक्रे यः प्रश्रय इव श्रियं ॥७१

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ ॥ सम्यगाराधिता विद्या प्रबोधविनयाविव ॥७२

तस्याः भरतो नाम शीलवान् तनयो जज्ञे जातः यस्तनयः प्रश्रयो विनयः श्रियमिव जनयित्री
मातरं अलंचक्रे भूषयति स्म ॥७१॥ सुताविति सुमित्रा लक्ष्मणशत्रुघ्नौ नाम यमौ
युग्मजातौ सुतौ पुत्रौ सम्यगाराधिता सम्यगभ्यस्ता विद्या प्रबोधविनयौ तत्त्वज्ञानें
द्रियजयाविव सुषुवे प्रसवति स्म ॥७२॥ यमौ द्वंद्वचरे ध्वांक्षे संयमे यमके पिचेति विश्वः

रघु स॰ १०

॥१८७॥

निर्दोषमिति सर्वजगत् भूर्लोकः निर्दोषं दुर्भिक्षादिदोषरहितं आविर्भूतगुणं प्रकटीकृतारोग्यादिगुणं चाभवत् अत्रोत्प्रेक्षते गां भुवं गते अवतीर्णे पुरुषोत्तमे विष्णौ स्वर्गोप्यन्वगादिव स्वर्गो हि गुणवान्निर्दोषश्च सोपि गमः स्वर्गतुल्यमभूदित्यर्थः ॥७३॥ तस्येति चतुर्मूर्तेः रामा

निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् ॥ अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमं ॥७३॥
तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ॥ विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥७४॥

गणपति

दिरूपेण चतुरूपस्य तस्य हरेरुदये सति पौलस्त्यात् रावणात् चकिताः भीताः ईश्वराः नाथाः यासां ताः दिशः तस्यैः विरजस्कैः विगतधूलिभिः नभस्वद्भिः वायुभिः मिषेण उच्छ्वसिता इव सुखेन श्वसितः कर्तरि क्तः स्वनाशकारणलाभसंतुष्टानां दिशां उच्छ्वसिता इव वा तामेवभूवुरित्यर्थः चतुर्दिगीशरक्षणं मूर्तिचतुष्टयप्रयोजनमिति भावः ॥७४॥ ॥

३६

कृशानुरिति रक्षसा रावणेन विप्रकृतौ अपकृतौ पीडिताविव्यर्थः कृशानुरग्निः प्रभाकरः सूर्यश्च यथासंख्यं अपधूमत्वात् प्रसन्नत्वाच्च अपविद्धशुचौ निरस्तदुःखाविवास्तां अभवतां ॥७५॥ दशानने तिनत्क्षणं तस्मिन्क्षणे रामोत्पत्तिसमये राक्षसश्रियः अश्रुबिंदवः दशाननकिरीटेभ्यः म

कृशानुरपधूमत्वात्प्रसन्नत्वात्प्रभाकरः ॥ रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥७५॥
दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ॥ मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिंदवः ॥७६॥
पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः ॥ आरंभं प्रथमं चक्रुर्देवदुंदुभयो दिवि ॥७७॥

णीनां व्याजेन मिषेण पृथिव्यां पर्यस्ताः पतिताः रामोदये सति तद्धन्यस्य रावणस्य किरीटमणिभ्रंशलक्षणं दुर्निमित्तमभूदित्यर्थः ॥७६॥ पुत्रेति पुत्रिणो जातपुत्रस्य तस्य दशरथस्य पुत्रजन्मनि प्रवेश्यानां प्रवेशयितव्यानां वादनीयानामित्यर्थः तूर्याणां वाद्यानां आरंभं

३७

र·टी·स·१०

॥३९॥

संतानकेति अस्य राघोर्भवने संतानकानां कल्पवृक्षसंबंधिकुसुमानां विकारः संतानकमयी वृष्टिः अस्य पेतुषी पपा
त वसुः क्वसुश्चेति क्वसुप्रत्ययः। उगितश्चेति ङीप् सा वृष्टिरेव संतः पुत्रजन्मन्यावश्यककार्ये मंगलोप
चाराः तेषां आदिरचना प्रथमक्रिया अभवत्॥७८॥ कुमारा इति कृताः संस्काराः जातकर्मादयो

संतानकमयी वृष्टिः भवने चास्य पेतुषी॥ सन्मंगलोपचाराणां सैवादिरचनाभवत्॥७८॥
कुमाराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः॥ आनंदेनाग्रजेनेव समं ववृधिरे पितुः॥७९॥

गणपति

येषां ते धात्रीणां उपमातॄणां स्तन्यानि पयांसि पिबंतीति तथोक्ताः ते कुमाराः अग्रजेनेव ज्येष्ठेनेव
स्थितेन पितुरानंदेन समं ववृधिरे कुमारवृद्ध्या पितामहोत्तमानंदमवापेत्यर्थः कुमार
जन्मनः प्रागेव जातवान् अग्रजत्वोक्तिरानंदस्य॥७९॥ ॥



स्वाभाविकमिति तेषां कुमाराणां संबंधि स्वाभाविकं सहजं विनीतत्वं विनयस्य कर्मणा शिक्षया
हविर्भुजां अग्नीनां सहजं तेजो हविषा आज्यादिकेनेव मुमूर्छ ववृधे निसर्गसंस्काराभ्यां विनीता
इत्यर्थः॥८०॥ परस्परेति परस्परम विरुद्धाः अविद्विष्टाः सौभ्रात्रवंतः गुणवंत इत्यर्थः ते कुमाराः तत्

स्वाभाविकं विनीतत्वं तेषां विनयकर्मणा॥ मुमूर्छ सहजं तेजो हविषेव हविर्भुजां॥८०॥
परस्पराविरुद्धास्ते तद्रघोरनघं कुलं॥ अलमुद्योतयामासुर्देवारण्यमिवर्तवः॥८१॥

गणपति

प्रसिद्धं अनघं निःपापं रघोः कुलं ऋतवो वसंतादयो देवारण्यं नंदनमिव सहजविरोधिना
मपि ऋतूनां सहावस्थानसंभवार्थं देवविशेषणं अलमत्यंतं उद्योतयामासुः प्रकाशयामा
सुः सौभ्रात्रवंतः कुलभूषणायं तदिति भावः॥८१॥ ॥

रघु.टी.स.१०

॥ ... ०

२०

गणपति

समान इति शोभनाः स्निग्धाः भ्रातरो येषां ते सुभ्रातरः न घृतश्चेदादिकप्प्रत्ययो न भवति वंदितेभ्रातानुरिति निषेधात् तेषां भावः सौभ्रात्रं युवादित्वादण् तस्मिन् समानेपि चतुर्णां तुल्येपि यथोभौ रामलक्ष्मणौ प्रीत्या द्वंद्वं बभूवतुः द्वंद्वं कलहयुग्मयोरिति विश्वः द्वौ द्वौ साहचर्येण अभिव्यक्तौ कश्चित् कस्यचित्

समानेपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ॥ तथा भरतशत्रुघ्नौ प्रीत्या द्वंद्वं बभूवतुः ॥८२॥
तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ॥ यथा वायुविभावस्वोर्यथा चंद्रसमुद्रयोः ॥८३॥

स्नेहो नातिरिच्यत इति भावः ॥८२॥ तेषामिति तेषां चतुर्णां मध्ये द्वयोर्द्वयो रामलक्ष्मणयोः भरतशत्रुघ्नयोश्चेत्यर्थः वायुविभावस्वोर्वातानलयोरिव यथा चंद्रसमुद्रयोरिव ऐक्यं एकमत्यं कदाचन न बिभिदे एककार्यत्वं समानसुखदुःखत्वं च क्रमाद्यमाद्वया लभ्यते सहजसहकारी हि

४०

गणपति

त इति प्रजानाथास्ते कुमाराः तेजसा प्रभावेन प्रश्रयेण विनयेन च निदाघान्ते ग्रीष्मान्ते श्यामाभ्राणि येषां ते श्यामाभ्राः नातिशीतोष्णा इत्यर्थः दिवसा इव प्रजानां मनो जह्रुः ॥८४

ते प्रजानां प्रजानाथास्तेजसा प्रश्रयेण च ॥ मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ॥८४
स चतुर्धा बभौ व्यस्तः प्रसवः पृथिवीपतेः ॥ धर्मार्थकाममोक्षाणामवतार इवांगवान् ॥८५॥

स इति चतुर्धा संख्याया विधार्थे धा इति धाप्रत्ययः व्यस्तः विभक्तः पृथिवीपतेः दशरथस्य स प्रसवः संतानः चतुर्धा अंगवान् मूर्तिमान् धर्मार्थकाममोक्षाणां अवतार इव बभौ ॥८५

४१

गुणैरिति गुरुवत्सलाः पितृभक्ता स्ते कुमाराः गुणैः विनयादिभिः गुरुं पितरं दशरथं चतु
॥२९॥ रं तानां चतुर्दिगंतानां ईशाः चतुरंतेशाः तद्धितार्थेत्यादिनोत्तरपदसमासः तं दशरथमे

गुणैराराधयामासुस्ते गुरुं गुरुवत्सलाः॥ तमेव चतुरंतेशं रत्नैरिव महार्णवाः॥८६
गणपति सुरगज इव दंतैर्भग्नदैत्यासिधारैर्नय इव पणबंधव्यक्तयोगैरुपायैः॥ हरिरिव यु
गदीर्घैर्दोर्भिरंशैस्तदीयैः पतिरवनिपतीनां तैश्चकासे चतुर्भिः॥ ८७॥
इति श्रीमहाकाव्ये रघुवंशे कालिदासकृतौ दशमः सर्गः समाप्तः॥

वमहार्णवाश्चत्वारः समुद्राः रत्नैरिवाराधयामासुः आनंदयामासुः॥८६॥



सुरगज इति भग्नाः दैत्यानाम सिधाराः येस्ते चतुर्भिः दंतैः सुरगजः ऐरावत इव पणबंधे
॥२९॥ न फलसिध्यापणोघुताद्दिषु व्यक्तः भूतोमूल्येधनेपिपणश्चेतिविश्वः॥ व्यक्तयोगैरनु
मितप्रयोगैरुपायैश्चतुर्भिः सामादिभिः नयोनीतिरिव युगदीर्घैश्चतुर्भिः भुजैर्
हरिर्विष्णुः इव तदीयैः हरिसंबंधिभिः अंशैः अंशभूतैश्चतुर्भिः तैः पुत्रैः अवनिप
तीनां पतिः राजराजो दशरथः चकासे। चिदिपुते॥८७॥ इति श्रीपदवाक्यप्रमाण
पारावारपारीण श्रीमहोपाध्याय कोलाचल मल्लीनाथ सूरि विरचितायां रघुवंशटीका
यां संजीवनी समाख्यायां दशमः सर्गः समाप्तः॥ व शके १७९० सर्वधारिनाम संवत्सरे
चैत्र शुद्ध पंचम्यां समाप्तः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

४२

इतिदशमसर्गः समाप्तः गणपति ।।

७४

रघुवंश

त्रयोदशस्सर्गप्रारंभः॥ ॥१४॥

रघुवंका

॥ ६ ॥ श्रीगणेशायनमः॥ त्रैलोक्यत्राणाय सिंधोश्चकार बंधं करणं रिपूणां पुण्यप्र
णामं भुवनाभिरामं रामं विरामं विपदामुपासे ॥१॥ अथेति जानातीति ज्ञः इगुपधेत्यादि
ना कप्रत्ययः गुणानां ज्ञः गुणज्ञः रत्नाकरादि वर्ण्य गुणाभिज्ञ इत्यर्थः समो रामाभिधानो हरि
विष्णुः शब्दो गुणो यस्य तच्छब्दगुणं आत्मनः पदं विष्णुपदं आकाशमित्यर्थः वियद्विष्णु
गणपति पदं वा तु इत्यमरः शब्दगुणमाकाशमिति तार्किकाः। विमानेन पुष्पकेन विगाहमानः
सन् रत्नाकरं वीक्ष्य मिथो रहसि मिथोन्योन्यं रहस्यपीत्यमरः जायां पत्नीं सीतां इति
वक्ष्यमाणप्रकारेण उवाच रामस्य हरिरित्यभिधाने निरंकुशमहिमघोतनार्थो मिथो
ग्रहणं गोष्ठीविश्रंभसूचनार्थं॥१॥

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः॥ रत्ना
करं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच॥१॥

वैदेहीति हे वैदेहि सीते आमलयात् मलयपर्यंतं पंचम्या उपरिभिरिति पंचमी प
दद्वयं चैतत् मत्सेतुना विभक्तं द्विधाकृतं अस्यायत्नः सेतुरित्यर्थः हर्षाधिक्याच्च मद्ग्रह
णं फेनिलं फेनवंतं फेनादिलच्चेति लच्प्रत्ययः क्षिप्रकारी चाहमिति भावः।

वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमंबुराशिं॥ छा
गणपति यापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारं॥२॥

अंबुराशिं छायापथेन स्वातीपथेन विभक्तं शरत्प्रसन्नं आविष्कृतचारुतारं
आकाशमिव पश्य मम महानयं प्रयासः सफलः इति हृदयं छायापथो ना
म ज्योतिश्चक्रमध्यवर्ती कश्चित्तिरश्चीनोवकाशः॥२॥

र॰टी॰स१३

गुरोरिति यियक्षोः यष्टुमिच्छोः यजेः सनंताद् उप्रत्ययः गुरोः सगरस्य मेध्ये अश्वमेधार्हे तुरंगे कपिलेन मुनिना रसातलं पातालं संक्रमिते सति तदर्थं उर्वीं अवदारयद्भिः खनद्भिः नोऽस्माकं पूर्वैः पूर्वजैः वृद्धैः सगरसुतैः अयं समुद्रः परिवर्धितः किलेत्यैति

॥२॥ गरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे ॥ तदर्थमु

गणपति र्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥३॥ ॥४॥

ह्ये अनेन नः पूज्यत्वम् इति भावः यद्यपि तुरंगहारी शक्रः तथापि तस्य कपिलसमीपे दर्शनात् स एवेति भ्रान्तिः तन्मतस्यैव कविना यत्कपिलेनेति निर्दिष्टम् ॥३॥

४

गर्भमिति अर्कमरीचयः अस्मादब्धेः पादानात् गर्भं मन्मयं दधति बिभ्रति अस्य अर्थमित्यर्थः। अयमर्थो दशमसर्गे नाभिर्गर्भमित्यत्र स्पष्टीकृतः अयं कोऽप्युपकारीति भावः। अत्राब्धौ वसूनि धनानि धनेरत्नेव सुवर्णानीति विश्वः। विवृद्धिं अश्नुवते प्राप्नुवन्ति संपन्नानीत्यर्थः। असौ अपः इंधनं यस्य तं दा

गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि ॥ अबिन्धनं वह्निमसौ बिभर्ति प्रल्हादनं ज्योति

रजन्ययेन ॥४॥ तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ॥ विष्णोरिवास्यान

गणपति वधारणीयमीदृक्तया रूपमियत्तया वा ॥५॥ हकंबद्धिं बिभर्ति अप्काराप्याश्रितं तेन नस्य ज्ञतीति भावः अ

नेन प्रल्हादनं आल्हादनं ज्योतिः चंद्राख्यं अजनि जनितं जनेर्ण्यंतात्कर्मणि लुङ् प्रत्ययः सौम्यत्वमिति भावः ॥४॥

तां तामिति तां तामनेकां नित्यविशिष्टां ... अवस्थां भावं ... पक्षे ... प्रति

पद्यमानं भजमानं महिम्ना दश दिशो व्याप्य स्थितं विष्णोरिव अस्य रूपं स्वरूपं ... ईदृक्तया ... का

रत्वात् व्यापकात्वात् ईदृक्तया इयत्तया वा आकारतः परिमाणतश्च अनवधारणीयं दुर्ज्ञेयं रूपं ॥५॥

५

र०टी० ७३

नाभीति युगांते कल्पांते रुचिता परिचिन्तायोगः स्वात्मनिष्ठेव नित्यस्य स पुरुषो विष्णु लोकान् संहृ
॥४॥ स नाभ्यां प्ररूढं यदंबुरुहं तदासनेन तन्नाभिकमलकोशयेण प्रथमेन धात्रा दक्षादीनामपि स्थे
पितामहेन संस्तूयमानः सन् अमुं अधिशेते अमुमधिशेते इत्यर्थः कल्पांतेप्यलीनभावः॥६॥
यक्षेति पक्षच्छिदा गोत्रभिदा इंद्रेण अभयत्र सत्सु द्विषेत्यादिना क्विप् आत्तगंधा हृतगर्वाः अ
गणपति नाभिप्ररूढांबुरुहासनेन संस्तूयमानः प्रथमेन धात्रा॥ अमुं युगांतोचितयोगनिद्रः सं
हृत्य लोकान् पुरुषोधिशेते॥६॥ पक्षच्छिदा गोत्रभिदात्तगंधाः शरण्यमेनं शतशो महीं
ध्राः॥ नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयंते॥७॥ टीका भिभूता इत्यर्थः गंधो
गंधक आमोदे लेशे संबंधगर्वयोरिति विश्वः आत्तगंधोभिभूतः स्यादिति अमरः। महीं धारयंति महीं
ध्राः पर्वताः मूलविभुजादित्वात् कप्रत्ययः शतशः शरण्यं रक्षणसमर्थं एनं समुद्रं परेभ्यः शत्रुभ्यः
उपप्लाविनो भयवंतो नृपाः धर्मोत्तरं धर्मप्रधानं मध्यमभूमिपालमिव आश्रयंते अरेश्च विजि

६८

+७९

रसातलादिति अदिभवेन पुंसा आदिवराहेण भौरेतलेन प्रयुक्तो दूहनक्रियायाः कृतोद्धरणक्रिया
याः विवाहक्रिया च व्यज्यते भुवो भूदेवतायाः प्रलये प्रवृद्धं अस्य अब्धेरघमंभो मुहूर्तं वक्त्रा
भरणं कर्णारक्षणार्थं मुखावगुंठितं बभूव तदुक्तं उद्धृतासि वराहेण कृष्णेन शतबाहुनेति
+पुंसा-४ मुखेति अनेन्यसामान्या साधारणा न भवतीति अनेन्यसाधारणा केलनेषु वृत्तिर्भोगो यस्य स त
गणपति रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः॥ अस्याच्छमंभः प्रलयप्रवृद्धं मुहूर्तं व
क्त्राभरणं बभूव॥८॥ मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरंगाधरदानदक्षः॥ अनेन्यसामा
न्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिंधूः॥९॥ टी० थो कः इमसेवार्थं प्रतिपादयति तरंगा
एव अधरस्तस्य दाने समर्पणे दक्षश्चतुरो असौ समुद्रो मुखार्पणेषु प्रकृत्या सास्यादि प्रेषणं विना
प्रगल्भाः धृष्टाः सिंधूर्नदीः सिंधु समुद्रे नदीभेदे घ्रांचेति विश्वः। स्वयं पिबति पाययते च तरंगाधरमिति शे
षः नपादत्स्यायमे त्यादिना पिबतेर्ण्यन्तान्नित्ये परस्मैपदं निषेधः गतिबुद्धीत्यादिना सिंधूनां हि

७ ८०

॰सर्ग-३

॥५९॥

सत्त्वमिति अमी तिमयो मत्स्यविशेषाः तदुक्तं अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायत इति विवृताननत्वात् व्याननमुखत्वात् हेतोः आननविवृतत्वमित्यर्थः सत्त्वं मत्स्यादि प्राणिसहितं नदीमुखांभः आदाय

सत्त्वमादाय नदीमुखांभः संमीलयंतो विवृताननत्वात् ॥ अमी शिरोभिस्तिमयः सरंध्रैरू-
र्ध्वं वितन्वंति जलप्रवाहान् ॥१०॥ मातंगनक्रैः सहसोत्पतद्भिर्भिन्नान् द्विधा पश्य समु-
द्रफेनान् ॥ कपोलसंसर्पितया य एषां व्रजंति कर्णक्षणचामरत्वं ॥११॥ ॥८५॥

संमीलयंतः चंचुपुटानि संघट्टयंतः सरंध्रैः शिरोभिः जलप्रवाहान् ऊर्ध्वं वितन्वंति जलयंत्रक्री-
डासमाधिव्यज्यंते ॥१०॥ मातंगेति सहसोत्पतद्भिः मातंगनक्रैः मातंगाकारैर्ग्राहैः द्विधा भिन्नान् समु-
द्रफेनान् पश्य येफेना येषां जलमातंगनक्राणां कपोलेषु संसर्पितया संसर्पणेन हेतुना कर्णेषु क्ष-

गणपति

८

वेलेति वेलानिलाय वेलानिलं पातुमित्यर्थः क्रियार्थोपपदेत्यादिना चतुर्थी प्रसृताः निर्गताः महोर्मीणां वि-
स्फूर्जितं उद्रेकः तेनाशु जितिश्च प्रत्ययः तस्मान्निर्विशेषाः दुर्ग्रहभेदाः एते भुजंगाः सूर्यांशुसंपर्कसमृद्धरागैः

वेलानिलाय प्रसृता भुजंगा महोर्मिविस्फूर्जितनिर्विशेषाः ॥ सूर्यांशुसंपर्कसमृद्धरागै-
र्व्यज्यंत एते मणिभिः फणस्थैः ॥१२॥ तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगा-
त् ॥ ऊर्ध्वांकुरप्रोतमुखं कथंचित् क्लेशादपक्रामति शंखयूथं ॥१३॥ ॥८५॥

गणपति

प्रवृद्धकांतिभिः फणस्थैः मणिभिः व्यज्यंते व्यक्तीक्रियंते ॥१२॥ तवेति तवाधरस्पर्धिषु अधरसदृशेष्वित्यर्थः
विद्रुमेषु प्रवालेषु सहसोर्मिवेगात् पर्यस्तं क्षिप्तं ऊर्ध्वांकुरैः विद्रुमप्रवालप्ररोहैः प्रोतमुखं स्यूतव

९

र० सर्ग० १३
६

प्रवृत्तेनेति पयांसि पातुं प्रवृत्त एव प्रवृत्तमात्रः न तु पीतवान् तेन आवर्तवेगात् स्यादावर्तोऽम्भसां भ्रम इत्यमरः
भ्रमता घनेन अयं समुद्रः भूयः पुनरपि गिरिणा मंदरेण प्रमथ्यमान इव भूयिष्ठं अत्यंतं आभाति॥१४॥

प्रवृत्तमात्रेण पयांसि पातुमावर्तवेगात् भ्रमता घनेन॥ आभाति भूयिष्ठमयं समुद्रः
प्रमथ्यमानो गिरिणेव भूयः॥१४॥ दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजि
नीला॥ आभाति वेला लवणांबुराशेर्धारानिबद्धेव कलंकरेखा॥१६॥ ॥६॥

गणपति

दूरादिति अयश्चक्रनिभस्य लवणांबुराशेः दूरात् तन्वी अणुत्वेनावभासमाना तमालतालीवनराजि
भिर्नीला वेला तीरभूमिः धारानिबद्धा चक्रा[illegible] चक्राश्रिता कलंकरेखा मालिन्यरेखा मालिन्य

१०

॥१६॥

वेलानिल इति हे आयताक्षि वेला स्यात्तीरनीरयोरिति विश्वः वेलानिलः केतकरेणुभिः ते आ
ननं संभावयति किमर्थं भिन्यपेक्षायां प्रेक्षते बिंबाधरे बद्धतृष्णं मां मंडनेन आभरणक्रियया

वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षी॥ मामक्षमं मंडनकालहानेर्वेत्तीव
बिंबाधरबद्धतृष्णं॥१६॥ एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः॥ प्रा
प्ता मुहूर्तेन विमानवेगात् कूलं फलावर्जितपूगमालं॥१७॥

गणपति

कालहानिर्विलंबः तस्याः अक्षमं असहमानं कर्मणि षष्ठी कालहानिमसहमानं वेत्तीव इवे
ति किं नोचेत् कथं संभावयेदित्यर्थः॥१६॥ एत इति एते वयं सैकतेषु भिन्नाभिः शुक्तिभिः
पर्यस्तानि परितः क्षिप्तानि मुक्तानां पटलानि यस्मिन् तत्तथोक्तं फलैः आवर्जिताः आ

११

१० सर्ग १३

॥६॥ करुष्वेति मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः करभ इव ऊरू यस्याः सा करभोरूः ऊरू
त्तरपदादौपम्ये इत्यूङ्प्रत्ययः तस्याः संबुद्धिः हे करभोरु मृगवत् प्रेक्षते इति विग्रहः हे मृगप्रेक्षिणि तावत्
पश्चात् मार्गे कृषि ताध्वानि दृष्टिपातं कुरुष्व यि ये हि एषा सकानना भूमिः विदूरीभवतः समुद्रात् नि

कुरुष्व तावत् करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातं ॥ एषा विदूरीभवतः समुद्रात् सकानना
निष्पततीव भूमिः ॥१८॥ क्वचित्पथा संचरते सुराणां क्वचिद्घनानां पततां क्वचिच्च ॥ यथाविधो
मे मनसोभिलाषः प्रवर्तते पश्य तथा विमानं ॥१९॥ [illegible] निष्पततीति निष्क्रामतीव विदूर

रीभवतः विप्रकृष्यमाणात् च्विप्रत्ययः ॥१८॥ क्वचिदिति हे वैदेहि इदं विमानं पुष्पकं मे मनसः
अभिलाषो यथाविधो तथा प्रवर्तते । पश्य क्वचित् सुराणां पथा संचरते क्वचित् घनानां क्वचित्
पततां पक्षिणां च पथा संचरते समस्तनीयायुक्तादिति संपूर्वाच्चरतेरात्मनेपदं ॥१९॥ ॥६५॥
प

92

असाविति महेंद्रद्विपदानगंधी ऐरावतमदगंधी त्रिभिर्मार्गैः गच्छतीति त्रिमार्गगा गंगा तद्धितार्थेत्यादिनोत्त
रपदसमासः तस्याः वीचीनां विमर्देन संपर्केण शीतः असौ आकाशवायुः दिनयौवनोत्थान् मध्याह्नसंभवान् ते
मुखे स्वेदलवान् आचामति हरति अनेन सुरपथसंचारो दर्शितः ॥२०॥ करेणेति हे चंडि कोपने चंडइत्यं

असौ महेंद्रद्विपदानगंधी त्रिमार्गगावीचिविमर्दशीतः ॥ आकाशवायुर्दिनयौवनोत्थानाचामति
स्वेदलवान् मुखे ते ॥२०॥ करेण वातायनलंबितेन स्पृष्टस्त्वया चंडि कुतूहलिन्या ॥ आमुं
गणपति चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ॥२१॥

न कोपन इत्यमरः कुतूहलिन्या विनोदार्थिन्या त्वया कर्त्र्या वातायने गवाक्षे लंबितेन अवस्रंसितेन करेण
स्पृष्टः उद्भिन्नविद्युद्वलयो घनस्ते द्वितीयं आभरणं वलयमामुंचतीव अर्पयतीवापाचंडीत्यनेन को
पनशीलत्वात् भीतः क्षिप्रत्वात् आमुंचतीति व्यज्यते ॥२१॥

93

अमी इति अमी चीरभृतः तापसाः जनस्थानम् अपोढविघ्नं अस्तविघ्नं मत्वा समारब्धाः नवोटजाः
॥८॥ पर्णशालाः येषु तानि चिरोज्झितानि राक्षसभयादि त्यक्तानि आश्रममंडलानि आश्रमविभा
गान् यथास्वं स्वमनतिक्रम्य अध्यासते अधितिष्ठंति ॥२२॥ सैषेति सा पूर्वानुभूता स्थली

अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ॥ अध्यासते चीरभृतो य
गणपति थास्वं चिरोज्झितान्याश्रममंडलानि ॥२२॥ सैषा स्थली यत्र विचिन्वता त्वां भ्र
ष्टं मया नूपुरमेकमुर्व्यां ॥ अदृश्यत त्वच्चरणारविंदविश्लेषदुःखादिव बद्धमौनं ॥२३॥

एषा दृश्यत इत्यर्थः यत्र स्थल्यां त्वां विचिन्वता अन्विष्यता मया त्वच्चरणारविंदेन यो विश्लेषः
वियोगः तेन यद् दुःखं तस्मादिव बद्धमौनं निःशब्दं उर्व्यां भ्रष्टं एकं नूपुरं मंजीरः मंजीरो नू
पुरोऽस्त्रियामित्यमरः अदृश्यत दृष्टं हे तु उत्प्रेक्षा ॥२३॥



त्वमिति हे भीरु भयशीले इत्युक्तं नटत्युक्तेन भीरुत्वात् संबुद्धिः त्वं रक्षसा रावणेन यतो येन मार्गेण
सर्वविभक्तिकस्तसिः अपनीता अपहृता तं मार्गं वागिन्द्रियाभावात् वक्तुमशक्नुवत्यः एताः लताः वीरुधः
लता प्रतानिनी वीरुद्गुल्मिन्युलप इत्यमरः आवर्जिताः नमिताः पल्लवाः पाणिस्थानीयाः याभिस्ता
स्त्वं रक्षसा भीरु यतोपनीता तं मार्गमेताः कृपया लता मे ॥ अदर्शयन् वक्तुमशक्नुवंत्यः शाखा
गणपति भिरावर्जितपल्लवाभिः ॥२४॥ मृग्यश्च दर्भांकुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्मां ॥ व्या
पारयंत्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ॥२५॥ भिः स्थावयवभूताभिः शाखाभिः
कृपया मे अदर्शयन् हस्तचेष्टयादर्शयन्नित्यर्थः शाखापक्षांतरे भुजेइति विश्वः । लतादीनामपि ज्ञानम
स्त्येव तदुक्तं मुनिना अंतःसंज्ञा भवंत्येते सुखदुःखसमन्विता इति ॥२४॥ मृग्यश्चेति दर्भांकुरेषु भक्ष्ये
षु निर्व्यपेक्षाः निस्पृहाः मृग्यः मृगांगनाः उत्पक्ष्मराजीनि विलोचनानि दक्षिणस्यां दिशि व्यापारयं
त्यः प्रवर्तयंत्यः संत्यः तवागतिज्ञं गमनमभिज्ञं मां समबोधयन् अक्षिचेष्टया त्वद्गतिमवबोधयन्नित्यर्थः

र॰सर्ग १३
॥९५

एतदिति मा ल्यवतो नाम गिरेः अंबरलेखि अभ्रंकषं शृंगं एतत् पुरस्तात् अग्रे आविर्भवति आविर्भवति
यत्र शृंगे घनैर्मेघैः नवं पयो मया च त्वद्विप्रयोगेण यदश्रु तच्च समं युगपत् विसृष्टं मेघैर्दत्तं नात्

एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यंबरलेखिशृंगं॥ नवं पयो यत्र घनैर्मया च त्वद्विप्र
योगाश्रु समं विसृष्टं॥२६॥ गंधश्च धाराहतपल्वलानां कादंबमर्द्धोद्गतकेसरं च॥ स्निग्धा
श्च केकाः शिखिनां त्वया मे यस्मिन्विनाऽसह्यान्यभूवन्॥२७॥

गणपति

॥टी॰॥

च वर्षा तु स्यमसहमनुभूतमिति भावः २६॥ गंधश्चेति यस्मिन् शृंगे धाराभिः वर्षधाराभिः आहतानां प
ल्वलानां गंधश्च अर्द्धोद्गतकेसरं कादंबं नीपकुसुमं च स्निग्धाः मधुराः शिखिनां बर्हिणां
शिखिनो वह्निर्बर्हिणावित्यमरः केकाश्च त्वया विना मे असह्यानि बभूवुः नपुंसकमनपुंसकेन



पूर्वेति हे भीरु यत्र शृंगे पूर्वानुभूतं कंपोत्तरं कंपप्रधानं तवोपगूढं उपगूहनं रात्रौ स्मरता नाम
या गुहाविसारीणि घनगर्जितानि कथंचिद्वाहितानि स्मारकत्वेन उद्दीपकत्वात् कृ
च्छ्रेण गमितानीत्यर्थः॥२८॥ आसारेति यत्र शृंगे विभिन्नकोशैः विकसितकुड्मलैः नवकं

पूर्वानुभूतं स्मरता च रात्रौ कंपोत्तरं भीरु तवोपगूढं॥ गुहाविसारीण्यतिवाहि
तानि मया कथंचिद्घनगर्जितानि॥२८॥ आसारसिक्तक्षितिबाष्पयोगान्मा
मक्षिणोद्यत्र विभिन्नकोशैः॥ विडंब्यमाना नवकंदलैस्ते विवाहधूमारुणलोचनश्रीः २९

गणपति

दलैः कंदलीपुष्पैः अरुणवर्णैः आसारेण धारासंपातेन सिक्तायाः धारासंपात आसार इत्यम
रः क्षितेर्बाष्पस्य योगाद्धेतोः विडंब्यमाना अनुक्रियमाणा तेतव विवाहधूमेन अरुणा
लोचनश्रीः सा क्षिणोत् स्पर्धमानेति शेषः मामक्षिणोत् अपीडयत्॥२९॥ ५५॥

१-सर्ग

॥ ३०॥ उपांतेति उपांते वानीरवनैः वेतसवनैः उपगूढानि पार्श्वे वेष्टितानि आलक्ष्याः ईषद् दृश्याः पारिप्लवाश्चंचलाः सारसाः येषु तानि अमूनि पंपासलिलानि पंपानाम सरस्तस्य जलानि दूराद् अवतीर्णा मे दृष्टिः अतएव खेदात् पिबतीव न विहातुम् उत्सहते इत्यर्थः॥ ३०॥ अत्रेति हे प्रिये अ

उपांतवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि॥ दूरावतीर्णा पिबतीव खेदादमूनि पंपासलिलानि दृष्टिः॥ ३०॥ अत्राविमुक्तानि रथांगनाम्नामन्योन्यदत्तोत्पलकेसराणि॥ द्वंद्वानि दूरांतरवर्तिना ते मया प्रिये सस्पृहमीक्षितानि॥ ३१॥ ॥

णपति अत्र पंपासरसि अन्योन्यस्मै दत्तानि उत्पलकेसराणि यैस्तानि अवियुक्तानि रथांगनाम्नां द्वंद्वानि चक्रवाकमिथुनानि ते तव दूरांतरवर्तिना मया सस्पृहं साभिलाषं यथा तथा ईक्षितानि विलोकितानि तदा त्वाम स्मरमित्यर्थः॥ ३१॥



इमामिति स्तनवदभिरामो यो स्तबकस्तेनाभ्यां अवनम्रां तन्वीं कृशां इमां तटाशोकस्य लतां शाखां अतएव त्वत्प्राप्तिबुध्या त्वमेव प्राप्तेति भ्रांत्या परिरब्धुमालिंगितुं कामो यस्य सोऽहं सौमित्रिणा लक्ष्मणेन [illegible] इति इञ् प्रत्ययः अस्रैः अश्रुभिः सहितं यथा तथा निषिद्धः नेयं सीतेति निवारितः परिरब्धुं काम इत्यत्र तुं काममनसोरपीति मकारलोपः

इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्रां॥ त्वत्प्राप्तिबुध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः॥ ३२॥ अमूर्विमानांतरलंबिनीनां श्रुत्वा स्वनं कांचनकिंकिणीनां॥ प्रत्युद्व्रजंतीव खमुत्पतंत्यो गोदावरीसारसपंक्तयस्त्वां॥ ३३॥

णपति ॥३२॥ अमूरिति विमानस्य अंतरेषु अवकाशेषु लंबंते यास्तासां कांचनकिंकिणीनां स्वर्णक्षुद्रघंटिकानां किंकिणी क्षुद्रघंटिकेत्यमरः स्वनं श्रुत्वा स्वयूथशब्दभ्रमात् खं आकाशं उत्पतंत्यो अमूर्गोदावरीसारसपंक्तयः त्वां प्रत्युद्व्रजंतीव प्रत्युत्थानं कुर्वंतीव॥ ३३॥

॥९३॥ एषेति पेशलं सुकुमारं मध्यं यस्यास्तया भार्यया अपि सर्थः त्वया घटाभिः संवर्द्धिताः बालचूताः यस्याः सा उन्मुखाः अस्मद्दर्शनोन्मुखाः कृष्णसाराः यस्याः सा चिरात् दृष्टा एषा पंचवटी मे मम मनः आह्लादयति आनंदयति पंचवटी शब्दः पूर्वमेव व्याख्यातः ॥३४॥ अत्रेति अत्र पंचवट्यां गोदा गो

एषा त्वया पेशलमध्ययापि घटांबुसंवर्द्धितबालचूता ॥ आह्लादयत्युन्मुखकृष्ण
सारा दृष्टा चिरात् पंचवटी मनो मे ॥३४॥ अत्रानुगोदं मृगयानिवृत्तस्तरंगवा
तेन विनीतखेदः ॥ रहस्त्वदुत्संगनिषण्णमूर्द्धा स्मरामि वानीरगृहेषु सुप्तः ॥३५॥

गणपति

दावरीतस्याः समीपे अनुगोदं अनुर्थे समये त्यव्ययीभावः मृगयायाः निवृत्तः तरंगवातेन विनीतखेदः रहो रहसि अस्यं तसंयोगे द्वितीया त्वदुत्संगनिषण्णमूर्द्धा सन् अहं वानीरगृहेषु वेतसगेहेषु सुप्तः स्मरामि वाक्यार्थः कर्म सुप्तमिति यत् न तु स्मरामीत्यर्थः ॥ ३५॥ ॥



भ्रूभेदेति योमुनिः भ्रूभेदमात्रेण भ्रूभंगेनैव नहुषं राजानं मघोनः पदात् इंद्रत्वात् प्रभ्रष्टं याचकार त्र भ्रष्टं चकार यति स्म आविलांभः परिशुद्धिहेतोः कलुषजलप्रसादहेतोः तस्य मुनेः अगस्त्यस्यो दये शरदि जलं प्रसीदति इत्युक्तं प्राक् भूसौभावः भौमः स्थानपरिग्रहः आश्रमो यदृश्यत इति शेषः

भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ॥ तस्याविलांभः परिशुद्धिहेतोर्भौ

गणपति मो मुनेः स्थानपरिग्रहोयं ॥३६॥ त्रेताग्निधूमाग्रमनिंद्यकीर्तेस्तस्येदमाक्रांतवि
मानमार्गं ॥ घ्रात्वाहविर्गंधि रजोविमुक्तः समश्नुते मे लघिमानमात्मा ॥३७॥

भौमइत्यनेन दिव्योप्यस्तीत्युक्तं परिगृह्यत इति परिग्रहः स्थानमेव परिग्रह इति विग्रहः ॥३६॥ त्रेतेति अनिंद्यकीर्तेः तस्य अगस्त्यस्य आक्रांतविमानमार्गं अहविषं गंधो स्यास्तीति हविर्गंधि त्रीणीति त्रेता अग्नित्रयं त्रेताग्निस्त्रितये युगेत्यमरः पृषोदरादित्वादेत्वं त्रेते सप्तमः त्रेताग्नयः तेषां धूमाग्रं घ्रात्वा आघ्राय रजोगुणाद्विमुक्तोमे आत्मा अंतःकरणं लघिमानं लघुत्वं समश्नुते ॥ ३८॥

एतदिति हे मानिनि शातकर्णेर्मुनेः संबंधि पंचाप्सरो नाम पंचाप्सर इति प्रसिद्धं पंच अप्सरसो यस्मिन्निति वि-
ग्रहः पर्यंतेषु वनानि यस्य तत्पर्यंतवनं एतत् विहारवारि क्रीडासरः विदूरात् मेघानामंतरे मध्ये आलक्ष्यं
ईषद्दृश्यं आङीषदर्थेऽभिव्याप्तावित्यमरः इंदुबिंबमिव आभातीति ॥३८॥ पुरेति पुरा पूर्वस्मिन्काले दर्भां-

गणपति

एतन्मुनेर्मानिनि शातकर्णेः पंचाप्सरो नाम विहारवारि ॥ आभाति पर्यंतवनं विदूरान्मे-
घांतरालक्ष्यमिवेंदुबिंबं ॥३८॥ पुरा स दर्भांकुरमात्रवृत्तिश्चरन्मृगैः सार्द्धमृषिर्मघोना ॥ स-
माधिभीतेन किलोपनीतः पंचाप्सरोयौवनकूटबंधं ॥३९॥

कुरमात्रा वृत्तिः जीविका यस्य तथा मृगैः सार्द्धं चरन् सः ऋषिः समाधेस्तपसो भीतेन मघोना इंद्रेण
पंचानां अप्सरसां यौवनं तद्धितार्थे स्यानाऽनुत्तरपदसमासः तदेव कूटबंधं कपटयंत्रं उपनीतः उ-
न्मादः कूटयंत्रे स्यादित्यमरः मृगसाहचर्यान्मृगवदेव बद्ध इति भावः ॥३९॥ ॥



तस्येति अंतर्हितसौधभाजः जलांतर्गतप्रासादगतस्य शातकर्णेः अयं प्रसक्तः संततः संगीतमृदंगघो-
षः वियद्गतः सन् पुष्पकस्य मम विमानस्य चंद्रशालाः शिरोगृहाणि चंद्रशाला शिरोगृहमित्यमरः क्ष-
णं प्रतिश्रुद्भिः प्रतिध्वानैः मुखराः ध्वनंतीः करोति स्त्री प्रतिश्रुत्प्रतिध्वाने इत्यमरः ॥४०॥ हविरिति ना-
म्ना सुतीक्ष्णः सुतीक्ष्णनामा चरितेन दांतः सौम्यः असौ अपरः तपस्वी एधवतामिंधनवतां काष्ठदा-

गणपति

तस्यायमंतर्हितसौधभाजः प्रसक्तसंगीतमृदंगघोषः ॥ वियद्गतः पुष्पकचंद्रशालाः क्षणं प्रतिश्रु-
न्मुखराः करोति ॥४०॥ हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः ॥ असौ तपस्य-
त्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दांतः ॥४१॥ म्ना सुतीक्ष्णः सुतीक्ष्णना चरितेन दांतः सौम्यः

असौ अपरः तपस्वी एधवतामिंधनवतां काष्ठदार्विंधनं त्वेध इत्यमरः चतुर्णां हविर्भुजां अग्नीनां मध्ये
ललाटंतपतीति ललाटंतपः सूर्यः असूर्यललाटयोर्दृशितपोरिति खश्प्रत्ययः अरुर्द्विषदि-
त्यादिना मुमागमः ललाटंतपः सप्तसप्तिः सप्ताश्वः सूर्यो यस्य स तथोक्तः सन् तपस्यति तप-
श्चरति कर्मणो रोमंथतपोभ्यां वर्तिचरोरिति क्यङ् प्रत्ययः परस्मैपदं च ॥४१॥ ॥

र० सर्ग १३

॥ ४३ ॥

गणपति

अमूरिति जनितेंद्रशंकं तपस्येति शेषः अमूः सुतीक्ष्णं सहासं प्रहितानि ईक्षणानि दृष्टयो येषु तानि व्या
जेन केनचिन्मिषेण अर्द्धं यथा तथा संदर्शिता मेखलाः कांच्यो येषु तानि सुरांगनानां
इंद्रप्रेषितानां विभ्रमाः विलासा एव चेष्टितानि तं विकर्तुं विकारं कर्तुं स्ववशयितुमित्यर्थः अलं
समर्थानि न बभूवुरिति शेषः ॥ ४२ ॥ एष इति ऊर्ध्वबाहुः एषः सुतीक्ष्णः अक्षमालैव वलयं यस्य

अमूः सहासप्रहितेक्षणानि व्याजार्द्धसंदर्शितमेखलानि ॥ नालं विकर्तुं जनितेंद्रशंकं
सुरांगनाविभ्रमचेष्टितानि ॥ ४२ ॥ एषोऽक्षमालावलयं मृगाणां कंडूयितारं कुशसूचि
लावं ॥ सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुंक्ते ॥ ४३ ॥

तं मृगाणां कंडूयितारं कुशाग्राः सूचय इव ताः लुनातीति कुशसूचिलावस्तं कर्मण्यण् एभि
विशेषणैर्जपशीलत्वं भूतदयाकर्मक्षमत्वं च द्योत्यते सव्यादितरं दक्षिणं भुजं मे मम सभाजने सम्मा
नने निमित्ते सति निमित्तात् कर्मयोगे सप्तमी इतः प्राध्वं [illegible] नानुकूल्यं च प्रयुंक्ते अनुकूल्यार्थे प्रा
ध्वमित्यमरः प्राध्वं बंधन इति निपातः अव्ययं चैतत् ॥ ४३ ॥

24

वाचंयमत्वेति एषः सुतीक्ष्णः वाचं यच्छतीति वाचंयमो मौनव्रती वाचि यमो व्रते इति खच्प्रत्ययः वाचंयमपुरंदरौ
चेति मुम् तस्य भावस्तत्त्वात् मम प्रणतिं किंचित् मूर्ध्नः कंपेन प्रतिगृह्य स्वीकृत्य विमानेन व्यवधानं तिरोधा
नं तस्मान्मुक्तां अपेतापोढमुक्तपतितेत्यादिना पंचमीसमासः दृष्टिं पुनः सहस्रार्चिषि सूर्ये सं

वाचंयमत्वात्प्रणतिं ममैषः कंपेन किंचित्प्रतिगृह्य मूर्ध्नः ॥ दृष्टिं विमानव्यवधानमुक्तां
पुनः सहस्रार्चिषि संनिधत्ते ॥ ४४ ॥ अदः शरण्यं शरभंगनाम्नस्तपोवनं पावनमा
हिताग्नेः ॥ चिराय संतर्प्य समिद्भिरग्निं यो मंत्रपूतां तनुमप्यहौषीत् ॥ ४५ ॥

निधत्ते सम्यक् निधत्त इत्यर्थः अन्यथा कर्मकत्वप्रसंगात् ॥ ४४ ॥ अद इति शरणे रक्षणे साधु शरण्यं
पावयतीति पावनं अदो दृश्यमानं तपोवनं आहिताग्नेः शरभंगनाम्नो मुनेः संबंधः शरभंगः चि
राय चिरं अग्निं समिद्भिः संतर्प्य पर्यायित्वा तेनो मंत्रपूतां तनुमपि अहौषीत् जुहोतेर्लुङ् शरभंगो म

25

॥४४॥ छायेति अधुना अस्मिन्काले तस्य शरभंगस्य संबंधिनी अतिथीनां सपर्या अतिथिपूजा छायाभिः विनी
तोऽपनीतः अध्वपरिश्रमो येषु तेषु भूयिष्ठानि बहुतमानि संभाव्यानि श्लाघ्यानि फलानि येषां तेषु अमी
षु पादपेषु सुपुत्रेष्विव स्थिता सुपुत्रैरिव पादपैरनुष्ठीयत इति भावः॥४६॥ धारेति धारा निर्झराः यद्वा धा

गणपति छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु॥ तस्यातिथीनामधुना सपर्या
स्थिता सुपुत्रेष्विव पादपेषु॥४६॥ धारास्वनोद्गारिदरीमुखोऽसौ शृंगाग्रलग्नांबुदवप्रपं
कः॥ बध्नाति मे बंधुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः॥४७॥

रया सातत्येन स्वनोद्गारिदर्येव मुखं यस्य सः शृंगं शिखरं विषाणं च तस्याग्रे लग्नोंऽबुद एव वप्रपंकः
वप्रक्रीडासक्तपंको यस्य सः असौ चित्रकूटः हे बंधुरगात्रि उन्नतानतांगि बंधुरे तून्नतानतमित्यमरः
दृप्तः ककुद्मान् वृषभ इव मे चक्षुः बध्नाति नान्यासक्तं करोति॥४७॥



एषेति प्रसन्नो निर्मलः स्तिमितो निष्पंदः प्रवाहो यस्याः सा विदूरमस्य अंतरस्य मध्यवर्त्यवकाशस्य भावात् त
न्वी दूरदेशवर्तित्वात् तनुत्वेन अवभासमाना मंदाकिनी नाम काचित् चित्रकूटनिकटगा एषा सरित्
नगोपकंठे भूमेः कंठगता मुक्तावलीव आभाति अचलनगस्य शिरस्त्वेन तदुपकंठस्य कंठत्वं च गम्यते॥४८॥

गणपति एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरांतरभावतन्वी॥ मंदाकिनी भाति नगोपकं
ठे मुक्तावली कंठगतेव भूमेः॥४८॥ अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगंधि
यस्य॥ यवांकुरापांडुकपोलशोभी मयावतंसः परिकल्पितस्ते॥४९॥

अयमिति गिरेः समीपं अनुगिरं गिरेश्च सेनकस्येति समासांतोऽच् प्रत्ययः सुजातस्तमालोऽयं
दृश्यते शोभनो गंधो यस्य तत्सुगंधि गंधस्येत्वादिना समासांत इकारः यस्य तमालस्य प्रवालं पल्ल
वं आदाय मया ते यवांकुरवत् आपांडुरे कपोले शोभते यः सोऽवतंसः कर्णावतंसः परिकल्पितः॥४९

र.सर्ग.१३

॥२६॥

अनिग्रहेति निग्रहेण त्रासः निग्रहं विनायं त्रासः भयं तेन विनीताः शिक्षिताः सत्त्वाः जंतवो यस्मिन् तत्
तत् अपुष्पा लिंगात् पुष्पनिमित्तं विनैव फलबंधिनः फलग्राहिणः वृक्षाः यस्मिन् तत् अत एव आविष्कृ-
तोदग्रतरप्रभावं अत्रेर्मुनेः तपःसाधनं वनमेतत् ॥५०॥ अत्रेति अत्र वने अनसूया अत्रिपत्नी सप्तच
नेकृष्यमाणाः सप्तर्षयः दिक्संख्ये संज्ञायां इति समासः सप्तर्षीणां हस्तैः उद्धृतानि हेमपद्मानि यस्यां तां त्र्यं-

अनिग्रहत्रासविनीतसत्त्वमपुष्पलिंगात्फलबंधिवृक्षं ॥ वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावं ॥५०॥
अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्मां ॥ प्रवर्तयामास किलानसूया त्रिस्रोतसं त्र्यंबकमौलिमालां ॥५१॥
वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः ॥ निवातनिष्कंपतया विभांति योगाधिरूढा इव शाखिनोपि ॥५२॥

बकमौलिमालां हरशिरःस्रजं त्रिस्रोतसं भागीरथीं तपोधनानां ऋषीणां अभिषेकाय स्नानार्थं प्रवर्तयामास प्रवाहयामास
किलेत्यैतिह्ये ॥५१॥ वीरेति वीरासनैः साधनैः ध्यानं जुषंते सेवंते इति ध्यानजुषः तेषां तैः उपविश्य ध्यायतां ऋषीणां सं-
बंधिनः समध्यासितवेदिमध्याः इदं वीरासनस्थानीयं अमी शाखिनोपि वृक्षा अपि निवातनिष्कंपतया योगाधिरूढा इव
ध्यानभाज इव विभांति ध्यायंतोपि निश्चलांगा भवंति वीरासने वसिष्ठः एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितं
इतरस्मिंस्तथा चान्यं वीरासनमुदाहृतमिति ॥५२॥

25

२६

त्वयेति त्वया पुरस्तात् पूर्वं उपयाचितः प्रार्थितः तथा रामायणे न्यग्रोधं समुपस्थाय वैदेही वाक्यमब्रवीत् नमस्तेस्तु
महावृक्ष पालयेन्मे व्रतं पतिरिति यः श्याम इति नाम्ना प्रतीतः सः वटोयं फलितः सन् सपद्मरागः गारुडानां मणी-
नां राशिरिव विभाति ॥५३॥ क्वचिदिति क्वचिदित्यादिचतुर्भिः श्लोकैः प्रयागे गंगायमुनासंगमं वर्णयति हे अनवद्यांगि
यमुनातरंगैः भिन्नप्रवाहा मिश्रौघा गंगा जाह्नवी विभाति पश्य केव क्वचित्प्रदेशे प्रभया लिंपंति संमिश्रीकुर्वंतीति प्रभा-

त्वया पुरस्तादुपयाचितो यः सोयं वटः श्याम इति प्रतीतः ॥ राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥५३॥
क्वचित्प्रभालेपिभिरिंद्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ॥ अन्यत्र माला सितपंकजानामिंदीवरैरुत्खचितांतरेव ॥५४॥
क्वचित्खगानां प्रियमानसानां कादंबसंसर्गवतीव पंक्तिः ॥ अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चंदनकल्पितेव ॥५५॥

लेपिभिः तामिः इंद्रनीलैः अनुविद्धा ग्रथिता मुक्तामयी यष्टिरिव हारलतेव विभाति अन्यत्र प्रदेशे इंदीवरैः नीलोत्पलैः उत्खचितांतरा
खचितमध्या सितपंकजानां पुंडरीकाणां मालेव विभाति सर्वत्र संबंधः ॥५४॥ क्वचिदिति क्वचित् कादंबसंसर्गवती नीलकंठहंससंसृष्टा
प्रियमानसानां मानससरोवरप्रियाणां खगानां राजहंसानां पंक्तिरिव राजहंसालिरिव तेषां चरणोष्ठैः सितासितत्वात् अन्यत्र कालागुरुणा दत्तपत्रा
रचितमकरीपत्रा भुवश्चंदनकल्पिता भक्तिरिव ॥५५॥ ॥५॥ ॥५॥ ॥५॥

26

सर्ग १३ क्वचिदिति क्वचिच्छायासु विलीनैः स्थितैः तमोभिः शबलीकृता कर्बुरीकृता चांद्रमसी प्रभा चंद्रिकेव अन्यत्र रंध्रेषु आलक्ष्य
॥५६॥ नभःप्रदेशा शुभ्रा शरदभ्रलेखा शरन्मेघपंक्तिरिव ॥५६॥ क्वचिदिति क्वचित् कृष्णोरगभूषणा भस्मांगरागा ईश्वरस्य
तनुरिव विभाति शेषं व्याख्यातं ॥५७॥ समुद्रेति अत्र समुद्रपत्न्योः गंगायमुनयोः जलसंपाते पूतात्मनां तत्त्वकिलां

क्वचित्प्रभा चांद्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ॥ अन्यत्र शुभ्रा शरदभ्रलेखा रंध्रेष्विवालक्ष्यनभःप्रदेशा ॥५६॥ क्वचिच्च कृष्णोरगभूषणेव भस्मांगरागा तनुरीश्वरस्य ॥ पश्यानवद्यांगि विभाति गंगा भिन्नप्रवाहा यमुनातरंगैः ॥५७॥

गणपति

समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ॥ तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबंधः

संगमे अभिषेकात् स्नानात् पूतात्मनां नां शुद्धात्मनां तनुत्यजां पुंसां तत्त्वावबोधेन तत्त्वज्ञानेन विनापि प्रारब्धशरीरस्याग
नंतरं भूयः पुनः शरीरबंधः शरीरयोगो नास्ति किल अन्यत्र ज्ञानादेव मुक्तिः अत्र तु स्नानादेव मुक्तिरित्यर्थः अर्थवाद
श्चायं किंतु ज्ञानेनैव सत्यं भवतीत्यर्थः ॥५८॥ ॥५६॥ ॥५७॥ ॥५८॥

30

पुरमिति निषादाधिपतेः गुहस्य ननु पुरं इदं यस्मिन् पुरे मया मौलिमणिं विहाय जटासु बद्धासु रचितासु सत्सु सुमं
त्रः हे कैकेयि तव कामा मनोरथाः फलिताः सफलाः जाता इति अरुदत् रुदितवान् विमोचने रुरुदे ॥५९॥ पयोधरैरिति
पुण्यजनांगनानां यक्षस्त्रीणां पयोधरैः स्तनैः निर्विष्टः उपभुक्तः हेमांबुजरेणुर्यस्य तत् जन्तनाः क्रीडंतीति व्यज्यते ब्रा

पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ॥ जटासु बद्धास्वरुदत्सुमंत्रः कैकेयि कामाः फलिता
स्तवेति ॥५९॥ पयोधरैः पुण्यजनांगनानां निर्विष्टहेमांबुजरेणु यस्याः ॥ ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवा
व्यक्तमुदाहरंति ॥६०॥

गणपति

ब्रह्मणः इदं ब्राह्मं तेन ब्रह्मणा सृष्टमिति टिलोपः ब्राह्मं सरो मानसाख्यं यस्याः सरय्वाः बुद्धेः महत्तत्त्वस्य अव्यक्तं प्रधानमिव
कारणं आप्तस्य वाचो आप्तवाचो वेदाः यद्वा ब्रह्मोहिणा मुनयः उदाहरंति प्रचक्षते ॥६०॥ ॥६०॥

31

र-सर्ग-१३

जलानीति पूर्वः संबन्धः तत्पशुबंधनार्थो दारुविशेषः तीरनिखातयूपा यासरयूः तुरंगमेधाः अश्वमेधाः तेषु

॥६१॥ वभृथार्थमेव अवतीर्णैः स्नातैः रिवइक्ष्वाकुभिः इक्ष्वाकुगोत्रापत्यैः पूर्वैः तद्राजत्वादणो लुक् पुण्यतरीकृ

तानि जलानि अयोध्यां राजधानी नगरीं राज्ञो धीयंते स्मामिति अधिकरणे ल्युट् टिलानुङीप् अनु

जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीं ॥ तुरंगमेधावभृथावतीर्णैरिक्ष्वाकु

गणपति भिः पुण्यतरीकृतानि ॥६१॥ यां सैकतोत्संगसुखोचितानां प्राज्यैः पयोभिः

परिवर्द्धितानां ॥ सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानां ॥६२॥

अनुशब्दस्य लक्षणेत्थं भूतेत्यादिना कर्मप्रवचनीयत्वात्तद्योगे द्वितीया वहति प्रापयतिमया लक्षिते

त्यर्थः ॥६१॥ यामिति यांसरयूं मे मानसं कर्त्तृ सैकतं पुलिनं तदेव उत्संगः तत्र यत्सुखं तत्रोचितानां

प्राज्यैः प्रभूतैः पयोभिः अंबुभिः क्षीरैश्च पयः क्षीरं पयोंबु चेत्यमरः परिवर्द्धितानां पुष्टानां उत्तर

कोसलानां उत्तरकोसलेश्वराणां सामान्यधात्री सामान्यमातरमिव संभावयति तर्कयति धात्री ज



सेति मदीया जननी कौसल्येव मान्येन पूज्येन तेन राज्ञा दशरथेन वियुक्ता सक्तासाद्वयं सरयूः दूरे वसंतं

प्रवसंतं श्रोष्यागामि स्पर्थः मां पुत्र भूतं शिशिरानिलैः शिशिरो अनिलो वा नीयेषु तादृशैः तरंगैरेव

हस्तैः उपगूहतीव आलिंगतीव ॥६३॥ विरक्तेति विरक्ता अतिरक्ता सायं ध्यान द्वक्क पिशं तत्र पृथिव्या

सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ॥ दूरे वसंतं शिशिरानिलैर्मां तरं

गणपति गहस्तैरुपगूहतीव ॥६३॥ विरक्तसंध्याकपिशं पुरस्ताद्यतो रजः पार्थिवमुज्जि

हीते ॥ शंके हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥६४॥

इदं पार्थिवं रजो धूलिः पुरस्तादग्रे यतोयस्मात् कारणात् उज्जिहीते उद्गच्छति तस्मात् हनुरस्यास्तीति हनुमा

न् शरादीनां चेति दीर्घः तेन कथिता प्रवृत्तिः स्मदागमन वार्ता यस्य स भरतः ससैन्यः सन् मां प्रत्युद्गत इति

अहं शंके तर्कयामि अत्र यतस्तदोर्नित्य संबंधात् तच्छब्दलाभः ॥६४॥

र-सर्ग-१३

अद्धेति साधुः सज्जनः सः भरतः साधुर्वा धुर्षि के चारे सज्जने वापि वाच्यवदिति विश्वः पालित संगराय पा

॥१८॥ लितपित्रे प्रतिज्ञाय मे मह्यं अनघां मदीयां भोगाभावादक्षतां श्रियं राज्यलक्ष्मी संरक्षितां श्रियं मध्ये युद्धे ख

रादीन् हत्वा निवृत्ताय मे लक्ष्मणः संरक्षितवतीं अनघां त्वामिव प्रत्यर्पयिष्यति अद्धा सत्या सत्ये त्वद्धा

अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः॥ हत्वा निवृत्ताय मृधे खरादीन्

गणपति न् संरक्षितां त्वामिव लक्ष्मणो मे॥६५॥ असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्था

पितवाहिनीकः॥ वृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति॥६६॥

असावित्यभिसमरः॥६५॥ असावित्ति असौ पदातिः पादचारी चीरवासाः वल्कल वसनः पश्चात् पृ

ष्ठभागे अवस्थापितवाहिनी सेनायेन सत्तथोक्तः सन् नध्न तश्चेति कपू गुरुं वसिष्ठं पुरस्कृत्य वृद्धै

रमात्यैः अर्घ्यपाणी यस्य तथोक्तः सन् मामभ्युपैति॥६६॥

३४

पित्रेति यः भरतः पित्रा विसृष्टां दत्तां अंकं उत्संगं च गतामपि यां श्रियं युवापि मदपेक्षया मन्दत्वात् अ

भोक्ता सन् नूतनत्वात् न लोके तिष्ठति निषेधः इयंति वर्षाणि एतावतो वत्सरान् अंत्यंतसंयोगे द्वि

तीया तया श्रिया सह स्थितेति गम्यते उग्रं दुश्चरं आसिधारं नाम व्रतं अभ्यसतीव वर्तयतीव युवा यु

पित्राविसृष्टां मदपेक्षया यः श्रियं गताप्यंकगतामभोक्ता॥ इयंति वर्षाणि तया

गणपति सहोग्रमभ्यस्यतीव व्रतमासिधारं॥६७॥

वत्सासार्द्धं यत्र मग्धभर्तृवदाचरेत् अंतर्निवृत्तसंगस्यादासिधारव्रतं हितदिति यादवः एकस्मिन्

शयने मध्ये खड्गं निधाय स्त्रीपुंसौ यत्र ब्रह्मचर्येण स्वपनं तदासिधारव्रतं इति केचित् इ

दं चासिधाराचंक्रमण तुल्यत्वात् असिधारव्रतमित्युक्तं॥६७॥

३५ ॥६॥

सर्ग॥१३

एतावदिति दाशरथौ रामे एतावद् उक्तवति सति विमानं पुष्पकं कर्तृ तदीयां रामसंबंधिनीं इच्छां अ
धिदेवतयाभिषेण विदित्वा नस्तेऽरितं सदिस्मर्थः सविस्मयाभिः भरतानुगाभिः प्रकृतिभिः। प्रजाभिः
उदीक्षितं ज्योतिष्पथात् आकाशात् अवततार॥६८॥ तस्मादिति रामसेवायां विचक्षणः कुशलः

एतावदुक्तवति दाशरथौ तदीयामिच्छाविमानमधिदेवतया विदित्वा॥ ज्योतिःपथादवत
तार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः॥६८॥ तस्मात्पुरःसरविभीषणदर्शि
तेन सेवाविचक्षणहरीश्वरदत्तहस्तः॥ यानादवातरददूरमहीतलेन मार्गेण भंगिरचितस्फटि

हरीश्वरः सुग्रीवस्तेन दत्तो हस्तो यस्य दत्तहस्तावलंबः सन् पुरःसरो विभीषणस्ते
न दर्शितेन अदूरं महीतलं यस्य तेन भंगिभिः विच्छित्तिभिः रचितस्फटिकेन सोपानपर्वणा
मार्गेण तस्मात् यानात् पुष्पकात् अवातरत् अवतीर्णवान् नरनेन्दुः॥६९॥ ॥६९॥

३६

गणपति

स्य नेता ५

इक्ष्वाकिति प्रयतः स रामः इक्ष्वाकुवंशगुरवे वसिष्ठाय प्रणम्य अर्घपरिग्रहः स्वीकारः तस्यांते पर्यश्रुः परिगलि
तबाष्पः सन् भ्रातरं भरतं अस्वजत आलिंग्य तस्मिन् रामे भक्त्या अपोढः परिगतः पितृराज्यमहाभिषेको
येन तस्मिन् मूर्द्धि उपजघ्रौ च घ्राणं चकार पादानां लिटि रूपं॥७०॥ श्मश्र्विति श्मश्रूणां मुखरोम्णां प्रवृद्ध्या सं

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घपरिग्रहांते॥ पर्यश्रुरस्वजत मूर्द्धनि चोपजघ्रौ तद्भ
क्त्यपोढपितृराज्यमहाभिषेके॥७०॥ श्मश्रुप्रवृद्धिजनितानि नाकृतिविक्रियांश्च प्लक्षान्प्र
रोहजटिलानिव मंत्रिवृद्धान्॥ अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैर्वार्तानुयोगमधुराक्षरया च वाचा॥७१

स्कारः भावात् जनितान् आकृतौ वपुषि रूपे वा विकृतिर्येषां तान् अत एव तस्मात् रूपे वपुष्यपीति हेमः। अत एव
प्ररोहैः शाखावलंबिभिः अधोमुखैः मूलैः जटिलान् जटावतः प्लक्षान् न्यग्रोधानिव स्थितान् प्रणमतो मंत्रिवृद्धां
श्च शुभैः सूपाद्रैः दृष्टिपातैः वार्तस्य अनुप्रयोगेण कुशलप्रश्नेन मधुराक्षरया वाचा अन्वग्रहीत् अनुगृही
तवान्॥७१॥

३७

र॰सर्ग॰१३

दुर्जातेति अयं मे दुर्जातबंधुः दुर्जातं व्यसनं प्रोक्तमिति विश्वः ऋक्षहरीश्वरः सुग्रीवः एषः समरेषु पुरःप्रहर्ता पौ
॥२७॥ लस्त्यो विभीषण इति आह्नेन आदरवता कर्तरि क्तः रघुनंदनेन रामेण कथितावुभौ विभीषणसुग्रीवौ लक्ष्म
णभरतमपि व्युत्क्रम्य आलिंगनादिभिः संभाव्य ववंदे ॥७३॥ सौमित्रिणेति तदनु सुग्रीवादिवंदनानंतरं

दुर्जातबंधुरयमृक्षहरीश्वरो मे पौलस्त्य एष समरेषु पुरःप्रहर्ता ॥ इत्यादृतेन कथितौ रघुनंदनेन व्यु
गणपति त्क्रम्य लक्ष्मणमुभौ भरतो ववंदे ॥७३॥ सौमित्रिणा तदनु संससृजे स चैनमुत्थाप्य नम्रशिर
सम्भृशमालिलिंग ॥ रूढेंद्रजित्प्रहरणव्रणकर्कशेन क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥७४॥

सः भरतः सौमित्रिणा संससृजे संगतः सृज विसर्गे दैवादिकात् कर्तरि लिट् नम्रशिरसं प्रणमंतमेनं सौ
मित्रिमुत्थाप्य भृशं गाढं आलिलिंग किं कुर्वन् रूढेंद्रजित्प्रहरणैर्व्रणैः कर्कशेन अस्य सौमित्रे
रुरस्थलेन भुजमध्यं स्वकीयं क्लिश्यन्निव पीडयन्निव क्लिश्नाति रयं सकर्मकः क्लिश्नाति भुवन



त्रयमिति दर्शनात् ननु रामायणे ततो लक्ष्मणमासाद्य वैदेहीं च परंतप अभिवाद्य ततः प्रीतो भरतो वा
क्यमब्रवीत् इति भरतस्य कानि ज्येष्ठप्रतीयते किमर्थं ज्येष्ठमवलंब्य अनार्जवेन श्लोको व्याख्यातः
सत्यं किंतु रामायणश्लोकार्थः टीकाकारोक्तः श्रूयतां ततो लक्ष्मणमासाद्येत्यादिश्लोके आसादनं ल

रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरारुरुहुर्गजेंद्रान् ॥ येषु क्षर
गणपति त्सु बहुधा मदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते ॥७४॥

क्ष्मण वैदेह्याः अभिवादनं तु वैदेह्या एव अन्यथा पूर्वोक्तं भरतस्य ज्येष्ठत्वं विरु[illegible]ध्येतेति ॥७५॥ रामेति
तदानीं हरिचमूपतयः रामाज्ञया मनुष्यवपुः कृत्वा गजेंद्रानारुरुहुः ब[illegible]धा हे मदवारिधाराः क्ष
रत्सु वर्षत्सु तेषु गजेंद्रेषु ते कपियूथनाथाः शैलाधिरोहणसुखानि उपलेभिरे अनुबभूवुः ॥७४॥

२९ सानुप्लव इति। सानुप्लवः सानुगतः अभिसारस्त्वनुसरः सहायोऽनुप्लवोऽनुग इति यादवः। क्षणदाचराणां प्रभुः विभीषणोऽपि। प्रभवत्यस्मादिति प्रभवो जनको दशरथः प्रभवो यस्य स दशरथप्रभवो रामः तेन अनुशिष्टः आज्ञप्तः सन् रथान् भेजे। तानेव विशिनष्टि। मेरथाः मायाविकल्परचितैः संकल्पविशेषनिर्मितैः

सानुप्लवः प्रभुरपि क्षणदाचराणां भेजे रथान् दशरथप्रभवानुशिष्टः। मायाविकल्परचितैरपि ये तदीयैर्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः॥ ७५॥ ॥

गजानन

रपि तदीयैर्वैभीषणीयैः स्यन्दनैः रथैः तुलिता कृत्रिमभक्तिशोभाः न भवन्ति। तुलिता समीकृता कृत्रिमा क्रियया निर्वृत्ता भक्तीनां शोभा येषां ते तथोक्ताः तेषां तत्साम्यं न लभन्त इत्यर्थः। कृत्रिमस्त्वत्र ड्वितः क्त्रिः इति क्त्रिप्रत्ययः। क्त्रेर्मम् नित्यमिति मम्प्रत्ययः॥ ७५॥ ॥ २



भूय इति॥ ततो रघुपतिः साग्रजो भरतलक्ष्मणसहितः सन् विलसत्पताकं कामेन इच्छानुसारेण गतिर्यस्य तद्विमानं बुधबृहस्पतिभ्यां योगेन दृश्यो दर्शनीयः। तारापतिश्चन्द्रो दोषाभवं दोषाननं। सायंचिरमित्यादिना ट्युप्रत्ययः। तरलाविद्युत् चञ्चलविद्युत् अभ्रवृन्दमिव अध्यास्त अधिष्ठितवान्॥ ७६॥ तत्रेति। तत्र विमाने जगतामीश्वरेणादिवराहेण प्रजापतेरुद्धृतमिव

भूयस्ततो रघुपतिर्विलसत्पताकमध्यास्त कामगति साग्रजो विमानं। दोषाननं बुधबृहस्पतियोगदृश्यस्तारापतिस्तरलविद्युदिवाभ्रवृन्दं॥ ७६॥ तत्रेश्वरेण जगतां प्रलयादिवोर्वी वर्षात्ययेन रुचमभ्रघनादिवेन्दोः। रामेण मैथिलसुतां दशकण्ठकृच्छ्राद्भुक्तां धृतिमतीं भरतो ववन्दे॥ ७७॥ ॥

वर्षात्ययेन शरदागमेन अभ्रघनात् मेघसंघातात् इन्दोश्चन्द्रस्य रुचं चन्द्रिकामिव रामेण दशकण्ठ एव कृच्छ्रं संकटं तस्मात् प्रत्युद्धृतां धृतिमतीं संतोषवतीं मैथिलसुतां सीतां भरतो ववन्दे॥ ७७॥ ॥

र० स० ८२

२९ लंकेश्वरेति॥ लंकेश्वरस्य रावणस्य प्रणतीनां भंगेन निरासेन दृढव्रतं अखंडितपातिव्रत्यं अत
विनायक एव वंद्यं तज्जनकात्मजायाश्चरणयोर्युगं ज्येष्ठानुवृत्त्या जटिलं जटायुक्तं साधोः सज्जनस्य

लंकेश्वरप्रणतिभंगदृढव्रतं तद्वंद्यं युगं चरणयोर्जनकात्मजायाः॥ ज्येष्ठानुवृत्ति
जटिलं च शिरोस्य साधोरन्योन्यपावनमभूदुभयं समेत्य॥७८॥ ॥

अस्य भरतस्य शिरश्चेत्युभयं समेत्य मिलित्वा अन्योन्यस्य परस्परस्य पावनं पावयतीति पा
वनं शोधकं अभूत् भवतिस्म॥७८॥ ॥

४२

र० सर्ग १३ कोशेति आर्यः पूज्यः काकुत्स्थो रामः प्रकृतयः प्रजाः पुरःसरा यस्य तेन स्तिमितजवेन मंदवेगेन पुष्पकेण क्रोशार्धं
॥७९॥ परिमाणविशेषः क्रोशार्धं क्रोशैकदेशं गत्वा शत्रुघ्नेन प्रतिविहिताः संभृजिताः उपकार्याः पटभवनानि यस्मिंस्तस्मिं
स्तन् उदारे महति साकेतोपवने अयोध्यायाः उपवनं अध्युवास अधिवतिष्ठ साकेतः स्यादयोध्यायां कोसलानंदिनी

क्रोशार्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण॥ शत्रुघ्नप्रतिविहितोपका
र्यमार्यः साकेतोपवनमुदारमध्युवास॥७९॥ इतिश्रीरघुवंशे महाकाव्ये कालिदासकृतौ।
गणपति अयोध्यागमनं नाम त्रयोदशः सर्गः समाप्तः॥ श्रीगजाननार्पणमस्तु॥ ॥

च सेत्यमरः॥७९॥ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचि
तायां रघुवंशटीकायां संजीवनीसमाख्यायां त्रयोदशः सर्गः समाप्तिमगमत्॥१३॥ गणपति गजानन
हेरंब गणपति हेरंब ॥६२॥

४३

त्रयोदशसर्गसमाप्तः॥